# सूर्योदयः

श्रीभारतधर्ममहामण्डलस्य
मासिकं संस्कृतमुखपत्रम

सर्वतोभावेनाभिनवः

## सूर्यविज्ञानविशेषांकः

—अयम्—

### पूर्णं सूर्यविज्ञानसूत्रशतपत्रम्

[ श्रीमतां चन्द्रशेखरस्वामिनामपूर्वा कृतिः ]

( पृ० ५—१६ )

शोधपूर्णोनिबन्धः—कण्टकोद्धरणम्

एन्. सि. वि. नरसिंहाचार्याणां कृतिः

( पृ० १७—२२ )

—: एवम् :—

वाचोर्मतिं सहसः सूनवेभरे (ऋग्वेद), गुरुगीता, सम्पादकीयम्—विश्वसंस्कृतसम्मेलनम्
[ पृ० १ ] [ पृ० २ ] [ पृ० ३-४ ]
तथान्ते कर्ममीमांसावर्शनम् लेखः संवलितः
[ पृ० २३-२४ ]

सम्पादकः—डॉ॰ परमहंसमिश्रः

卐 वर्षम् ५६ 卐 अङ्कः २ 卐 फाल्गुनः २०३५ 卐 फरवरी १९७९ 卐 वार्षिकं मूल्यम्–९/०० नवरुप्यकाणि

—: अस्याङ्कस्य ५/०० पञ्चरुप्यकाणि :—

# पवित्रं पत्रशतपत्रम्

शास्त्रिणः मेवारामपाण्डेयाः, बहराइचवास्तव्याः

एको हंसो विचलिततमा विष्टपानां प्रकाशः, एको हंसः स्वयमनुभवी चात्मबोधप्रदृष्टिः।
एको हंसः सततपयसो दुग्धनिःसारकारी, एको हंसः सरस-रचना-लोक-वाराणसेयः। १॥

तस्मै श्रीमिश्रवर्याय श्रीमतेधीमते सते।
नमः परमहंसाय वाग्वरिष्ठाय मे नतिः॥२॥

भवत्संप्रेषितं पत्रं 'सूर्योदय' इहागतः।
पठित्वा निखिलं वृत्तं, परमानन्दितोऽ भवम्।३॥

भाषायाः धर्मजातीनां प्रचारः सर्वसम्मतः।
किन्तु हिन्दुपदेनापि जुगुप्सा विस्मयो महान्॥४॥

यवनेसाइधर्माणां प्रचारे नास्ति विघ्नता।
हिन्दुधर्म-प्रसारे तु विरोधो विधिसम्मतः॥५॥

सर्वकाराद् बहिस्तष्ठन् नार्य-धर्म-विरोधकृत्।
पदासीने स एवास्ति विरोधी मूलकर्तकः।६॥

भारती भारतस्यास्य देववाणी समीरिता।
न देशे देवभावश्चेत् देववाणी चलेत् कथम्? ॥७।

निसर्गेभिन्न-जन्तूनां भिन्ना भाषापि श्रूयते।
तथैव भिन्न-देशानां भाषा देशे च दृश्यते॥८॥

उर्दू भाषाङ्गलीभाषाद्वयं प्राधान्य-धारकम्।
संस्कृता नागरी भाषा हिन्दी नाद्यापि राष्ट्रगीः।९॥

भारतीयप्रदेशेषु या भाषा विभवान्विता।
तासु संस्कृतभाषायै रुचिः केन प्रदर्श्यते॥१०॥

प्रदेशे सर्वलोकानां मातृभाषा प्रदेशभूः।
किन्तु शासकवर्यैस्तु चाङ्गलीया प्रयुज्यते॥११॥

दौर्भाग्यमस्य देशस्य यत्र नैक्यमभूत् क्वचित्।
दुष्प्रभावोऽस्य सर्वत्र शासनेऽपि विलोक्यते॥१२॥

पञ्चभूतात्मकेदेहे नैक्यं जातु विधीयते।
अतो भारत देहेऽपि नैकताऽलोकिता क्वचित्॥१३।

आङ्गलीमाङ्गलो भाषामर्दू च तद्भाषिणः।
राष्ट्रभाषां समीहन्ते ध्रुवं ते पक्षपातिनः॥१४॥

संघर्षबहुलेदेशे राष्ट्रभाषा च का भवेत्।
अत्र वैमत्यकृद्भावः सम्मतः देशद्रोहिणाम्॥१५॥

त्रिंशद्वर्षपर्यन्तं शासनेनापि किं कृतम्।
हिन्दी च राष्ट्र भाषायाः पदे क्वापि न दृश्यते॥१६॥

राष्ट्रसम्पर्क भाषायाः प्रतिष्ठाप्या पदेऽधुना।
इदमेव समस्यानां, समाधानं सुसंस्कृतम्॥१७॥

सर्वे देशाः स्वभाषाभिः शोभन्ते समलंकृताः।
ऋते भारतदेशात् तु दुर्गतोऽन्यो न दृश्यते॥१८॥

सर्वजातिप्रचारे तु संप्रदायो न कथ्यते।
हिन्दुभिर्विहितानां तु कार्याणां सम्प्रदायिता॥१९॥

यवनेसाइधर्माणां वर्धते भारतेऽधुना।
सर्वासां जन जातीनां समुदायो ह्यपेक्षितः।
अतो भारतभाषासु का भवेद् राष्ट्रव्यापिनी? ॥२१॥

एक-पक्ष-प्रचारे संघर्षस्यानिवार्यता।
ध्रुवीभावेतु सर्वेषां विरोधो ध्रुवभावभृत्॥२२॥

स्वलक्ष्यपूर्तये सर्वे प्रयतन्ते मनीषिणः।
साफल्यं प्रभु-वर्याणामधीनं तथ्यतो भवेत्॥२३॥

अपरं चापि वक्तव्यम् श्रीमतां पुरतोऽस्ति यत्।
प्रेषिते ममपत्रे तु कृतं संशोधनं शुभम्॥२४॥

भावभाषार्थजातानां छन्दसां गणवीक्षणम्।
कृत्वाह्यत्रापि छन्द सु कर्तव्यं शोधनं परम्॥२५॥

भाषां-विलास-विषये गाण्डीवमवलोकितम्।
परन्तु भवतां पद्ये, सर्व-दर्शनमीरितम्॥२६॥

एकस्मिन्नेव पद्येतु यत्र भाषां विलासिता।
प्रतिपादिता भवद्भिस्तु तत्र दर्शन-सारता॥२६॥

भाव-भाषादि-रचना-विवेकौचित्य-शालिनी।
प्रतिभाभ्यासवताम् सत्यम्, भवतादनुगमिनी॥२७॥

* * *

# सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सवत्र सूर्योदयः ॥

५६ तमे वष ] वाराणसी, फाल्गुन २०३५ फरवरी १९७९ [ अङ्कः २

## 卐 वाचो मतिं सहसः सूनवेभरे 卐

प्र तव्यसीं नव्यसीं धीतिमग्नये, वाचो मतिं सहसः सूनवे भरे।
अपां नपाद्यो वसुभिः सह प्रियो, होता पृथिव्यां न्यसीददृत्वियः ॥ १ ॥
सजायमानः परमे व्योमन्याविरग्निरभवन् मातरिश्वने ।
अस्य क्रत्वा समिधानस्य मज्मना प्रद्यावा शोचिः पृथिवी आरोचयन् ॥ २ ॥
अस्य त्वेषा अजरा अस्य भानवः, सुसंदृशः सुप्रतीकस्य सुद्युतः।
भात्वक्षसो अत्यक्तुर्न सिन्धवोग्ने रेजन्ते अससन्तो अजराः ॥ ३ ॥
यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना।
अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति ॥ ४ ॥

ऋ० १।१४३।१-४

अहमग्नये तवीयसीं नवामपूर्वां यज्ञप्रक्रियां विदधामि, स्तुतिञ्च करोमि। सः बलस्य पुत्रः एवम् पयसः नप्ता अस्ति। सः यजमानस्य प्रियः होमसम्पादकश्च अस्ति। ऋतूनां ऋतूनां च ज्ञाता अग्निः वसुभिः सह पृथिव्यां निवसति।

सर्वप्रथमं स अरणीभ्यामुत्पद्यमानः परमे व्योमनि वायवे प्रादुर्भवति। वायुसंयोगादेव प्रज्ज्वलितः भवति तथा यज्ञे श्वसिति। क्रतुकर्मणा प्रवर्धमानः स्वरोचिषा द्यावापृथिवीं च प्रारोचयत्।

अस्य अग्नेः दीप्तयः अजरा अमराश्च भवन्ति। सुमुखस्य अस्य मरीचयः चारुतरा प्रचकाशन्ते। प्रकाशशक्त्या नैशं तमः अतिक्रम्य प्रतिक्षणं स्यन्दमानाः सावधानाश्चास्यरश्मयः स्वदाहपाकादिकर्मभिः कदापि विरताः न भवन्ति।

भृगुवंशोत्पन्नाः ऋषयः एनमग्निं वेद्यां कुण्डस्य नाभिप्रदेशे वा स्थापयन्ति। स्वकीये गृहे च प्रतिष्ठाप्य सततं स्तुवन्ति। अयमेव मुख्यरूपेण धनानां स्वामी भवति। अयम् ऐश्वर्यसम्पन्नः अग्निः आदित्य इव वरुण इव वा सर्वदैव शोभमानः विराजते।

# श्रीगुरुगीता

## ( योगलक्षणानि भेदाश्च )

### श्रीमहादेवी उवाच

हे विश्वात्मन् ! महायोगिन् ! दीनबन्धो ! जगद्गुरो !
त्रितापाद्रक्षितुं जीवान्नेतुं मुक्तेः पदं तथा ॥ ८१ ॥
योग-मार्ग-प्रचारोऽत्र गुरुभिर्यः प्रकाशितः ।
तल्लक्षणानि भेदांश्च कृपया वद मे प्रभो ॥ ८२ ॥

### श्रीमहादेव उवाच

मन्त्रयोगो लयश्चैव राजयोगो हठस्तथा ।
योगश्चतुर्विधः प्रोक्तो योगिभिस्तत्त्वदर्शिभिः ॥ ८३ ॥
नामरूपात्मिका सृष्टिर्यस्मात्तदवलम्बनात् ।
बन्धनान्मुच्यमानोऽयं मुक्तिमाप्नोति साधकः ॥ ८४ ॥
तामेव भूमिमालम्ब्य स्खलनं यत्र जायते ।
उत्तिष्ठति जनः सर्वोऽध्यक्षेणैतत्समीक्ष्यते ॥ ८५ ॥
नामरूपात्मकैर्भावैः बध्यन्ते निखिला जनाः ।
अविद्याकलिताश्चैव तादृक्प्रकृतिवैभवात् ॥ ८६ ॥
आत्मनः सूक्ष्मप्रकृतिं प्रवृत्तिञ्चानुसृत्य वै ।
नामरूपात्मनोः शब्दभावयोरवलम्बनात् ।
यो योगः साध्यते सोयं मन्त्रयोगः प्रकीर्त्तितः ॥ ८७ ॥
प्राणापान--नाद--विन्दु--जीवात्म-परमात्नाम् ।
मेलनात् घटते यस्मात् तस्माद्वै घट उच्यते ॥ ८८ ॥
आमकुम्भमिवाम्भस्थं जीर्यमाणं सदा घटम् ।
योगानलेन संदह्य घटशुद्धिं समाचरेत् ॥ ८९ ॥
घटयोगसमायोगात् हठयोगः प्रकीर्त्तितः ।
मन्त्राद्धठेन सम्पाद्यो योगोऽयमिति वा प्रिये ।
हठयोग इति प्रोक्तः हठाज्जीवशुभप्रदः ॥ ९० ॥
हठयोगेन प्रथमं जीर्यमाणामिमां तनुम् ।
द्रढयन् सूक्ष्मदेहं वै कुर्यात् योगयुजं पुनः ॥ ९१ ॥
स्थूलः सूक्ष्मस्य देहो वै परिणामान्तरं यतः ।
कादिवर्णान् समभ्यस्य शास्त्रज्ञानं यथाक्रमम् ॥ ९२ ॥
यथोपलभ्यते तद्वत् स्थूलदेहस्य साधनैः ।
योगेन मनसो योगो हठयोगः प्रकीर्त्तितः ॥ ९३ ॥

# विश्वसंस्कृतसम्मेलनम्

सम्प्रति सर्वे सुविचारकाः, मनीषिणः, अस्य भगवतः लीलास्थलीललामस्य भारतवर्षस्य सांस्कृतिकमुत्कर्षं कामयमानाः महनीयाः विद्वांसः, सामान्याः जनाश्च देवभाषायाः समुन्नतिं समीहन्ते ! स्थाने स्थाने प्रदेशे प्रदेशे सभाः समायोज्यन्ते, भाषणानि दीयन्ते, संस्कृतप्रसारप्रचारोपायाश्च प्रदर्श्यन्ते, पत्रपत्रिकासु च विज्ञप्तयः मुद्राप्यन्ते किन्तु नावलोक्यते कश्चित् रमणीयनिर्णयः परिणामः, उपर्युक्तस्य प्रयासस्य ।

संस्कृतसमुत्कर्षसदुद्देश्यसिद्धये कश्चित् महाप्रयासः अपेक्षितः—इत्येवं सुविचार्य्यैव विश्वसंस्कृतसम्मेलनायोजनानि समायोजितानि पाण्डिचेरी-आश्रमेण श्रीमातुः जन्मशताब्दसमारोहसन्दर्भे । शतसंख्याकानि सम्मेलनानि जातानि यत्र तत्र, किन्तु न तत्रत्याः संरावाः आयोजनस्थान–सीमानमतिक्रम्य अन्यत्र प्रदेशेषु जनान् संप्रैरिषत । सर्वान् विचारकान् सामान्यां जनताञ्च प्रेरयितुं सम्यक् प्राभाव्यं भावयितुं विश्वसंस्कृतसम्मेलनम् २४ जनवरी ७९ दिनाङ्के प्रयागे विश्वहिन्दूपरिषदः सभामंच एव, द्वितीयविश्वहिन्दूसम्मेलनस्य सन्दर्भे प्रागेव, माघमहोत्सवशुभावसर एव समायोजितम् ।

प्रत्यक्षदर्शिना मया यदवलोकितम् तेन हृदयं प्रफुल्लितम्, सुशोभने मंचे मान्याः मनीषामूर्धन्याः विद्वांसः यत्र देवगिरा प्रवदन्त आसन् प्रतिभातिस्म यत् साक्षात् सुधर्मा तत्र सुप्रतिष्ठिता आसीत् । ध्वनिप्रसारकैः यन्त्रैः यदा संस्कृतशब्दाः प्रोच्चार्यमाणाः विहायसि व्याप्य तरङ्गिताः आसन्, लगतिस्म यत् प्रयागः तीर्थराजः विश्वात्मानं जागरयन्नासीत् । अमन्दानन्दसन्दोहमनुभवन्तः समे सामाजिकाः प्रेक्षकाश्च तत्र सुप्रसन्ना एव समवलोकिताः ।

व्यवस्थायां तु स्खलितयः भवन्त्येव, दोषाश्च शिष्यन्त एव यथा तत्रापि अध्यक्षभाषणप्रतयः अप्राप्ताः आसन् । मन्ये भाषणं प्राङ्मुद्रितमेव नासीत् । कार्यक्रमस्य प्रचारः नासीत्, मुद्रणव्यवस्थापकं स्वतः मिलित्वा यदा एतत्सम्बन्धे मयाऽनुयोगः समुपस्थापितः तदा तैः महोदयैः समुत्तरितं यत् समुपलब्धे वितीर्यन्ते । सूर्योदयेदत्ते तैःकथितं यत् श्वः आगत्य सूचना ग्राह्या । प्रतीयतेस्म यत् नासीत् विश्वसंस्कृतसम्मेलनसम्बन्धे पूर्वजागरूकता ।

द्वितीये सायंकालीनेऽधिवेशने यदा प्रस्तावेषु विचाराः चलन्त आसन्, विचारकाणां ध्वनिविस्तारकेण भाषमाणानां शिरसि आरुह्य इव श्रीमान् वसन्ताचार्यः भाषणावरोधप्रक्रियां समपूरयत् । तत्तु महदपमानजनकमिवासीत् । क्षुद्रघण्टिकास्वनसंकेतेनैव यत्साध्यमासीत् तत् नागराचारप्रातिकूल्येन समाचर्य्यत । प्रस्तावानां प्रतयश्च न पूर्वतः समुपलब्धाः न च प्रचारिताश्च । तदपि 'एकोहि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः इति सूक्त्यनुसारं विश्वसंस्कृतसम्मेलन महाप्राभाव्यसमपेक्षया अपरिगणनीयमेव सर्वम् ।

महाकवेरभिराजराजेन्द्रस्य स्वागतगानम् 'विदधात्ययं प्रयागो रे ! भवतां सभाजनम्' महच्चित्ताकर्षकमासीत् । प्रयागस्य सभाजने आसीत् किमपि वैलक्षण्यम् यत् संस्कृतोत्कर्षतारुण्यं वहन् सः पीयूषवर्षतारुण्यम् सर्वतः व्यकिरत् । समयः सर्वान् संस्कृतज्ञान् समाह्वयति संस्कृत–समुत्कर्षं सम्पादयितुमिति सूर्योदयः स्वकीयं पूर्णं सहयोगं प्रदातुं संस्कृतसेवायै समर्पितसर्वस्वान् समाश्वासयति ।

### काश्यां विश्वसंस्कृत सम्मेलनशाखा समारोहः—

विश्वसंस्कृत–संम्मेलनस्य काश्यां प्रतिष्ठापितायां शाखायामपि गतवानासम् । तत्र संस्कृतविदुषां नैराश्यपूर्णं सहयोगं दृष्ट्वा मनसि खिन्नता समागता । संयोजकैः विश्वनाथदेवमहाभागैः सर्वे काशीस्थाः विद्वांसः छात्राः

अध्यापकाः महाविद्यालयानां संस्कृतविभागाध्यक्षाः समाहूता आसन् किन्तु क्वाचित्का एव समागतास्तत्र ।

मुख्ये सम्मेलने श्रीपट्टाभिरामशस्त्रिणां साभाध्यक्ष्ये सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतीनां श्रीमताम् बदरीनाथशुक्लमहाभागानां वैदुष्यविभूषितं अभिभाषणमभवत् ।

## सम्मेलने एते प्रस्तावाः पारिताः

### प्रथमः प्रस्तावः

विश्वसंकृत-सम्मेलनस्य काशीशाखाया इदं संस्कृत-सम्मेलनं भारतशासनं साग्रहमनुरुणद्धि यद् भारतराष्ट्रस्य स्वरूपरक्षाबायिकां विश्वशान्तिसाधिकां भारतीयसंस्कृतिं जगति प्रसारयितुं राष्ट्रसच्चालकानामनिवार्यं कर्तव्यं यत् त्रिभाषायोजनायां देववाणीं संस्कृतमनिवार्यतया समायोजयन्तु । एकत्रिंशद्वर्षमिते दीर्घतमे स्वातन्त्र्यकाले सर्वथा समुपेक्षितस्य विषयस्यास्य यथाशीघ्रं यथा कार्यान्वयनं भवेत् तथैव कार्यमिदं देशस्य विश्वस्य च क्षेमाय कल्प्येतेति सम्मेलनस्यास्य द्रढीयान् विश्वास : ।

### ख—

प्रस्तावस्यास्य कार्यान्वियनाय सम्मेलनमिदं भारतशासनं साग्रहं प्रार्थयते यच्छासनमचिरादेव शिशुकक्षातः उत्तरमाध्यमिक–कक्षां यावत् सर्वासु परीक्षासु अन्यूनम् पञ्चाशदङ्कमितं संस्कृविषयकं स्वतन्त्रं पत्रं निर्धारयितुं तदर्थञ्च क्रमिकपाठ्ग्रन्थांश्च सुलभीकरोत्विति ।

प्रस्तावकः–श्री कृष्णदेवः

अनुमोदकः–मनुदेवभट्टाचार्यः

### द्वितीयः प्रस्तावः

भारतशासनेन चिरात् शासनादेशद्वारा आचार्य-शास्त्रि-परीक्षयोः बी० ए०, एम० ए०, परीक्षासमकक्षता समुद्घोषिता वर्तते । तथापि व्यवहारपदेषु विभिन्नशासकीयसेवासु नियमस्यास्य कार्यान्वयनमतितरां समुपेक्षितं परिदृश्यते । सम्मेलनमिदं भारतशासनं प्रार्थयते यत् सर्वेभ्यो राजशासनेभ्यस्तत् सुपुष्टमधिकृतञ्च यदिमं शासनादेशमालक्ष्य बी० ए० एम० ए० योग्येषु तत् तत् पदेषु समुचितयोग्यतावताम् आचार्य-शास्त्रि-परीक्षोत्तीर्णानां स्नातकानां सर्वाणि तानि राज्यानि अविशेषेण कथमपि कार्पण्यं न विदधीरन् ।

### तृतीयः प्रस्तावः

सम्मेलनमिदम् उत्तरप्रदेश-शासनं विशेषतोऽनुरुणद्धि यत्तेन तु स्वकीये राज्ये त्रिभाषायोजनायां संस्कृतमनिवार्यत एव नियोजनीयम् । राज्येऽस्मिन् मातृभाषा-राष्ट्रभाषा च एकैव, अतः संस्कृतस्य भाषायोजनायां निवेशने महत्तरं सौविद्धयं भविष्यति । सर्वासां मातृभाषाणां राष्ट्रभाषायाश्च निर्विशेषं परिपोषिकाया अस्याः संस्कृतभाषाया योजनायामस्यां समुपेक्षणं संस्कृत-मातृगृह्यमानस्य राज्यस्यास्य सुषमायै कथमपि न भवेदिति सम्मेलनस्य सुदृढं मतम् ।

### चतुर्थः प्रस्तावः

सम्मेलनमिदं भारतशासनं साग्रहं प्रार्थयते यदस्माकं राष्ट्रे वैदेशिक–राष्ट्रियधर्मप्रचारकैः–व्यापकरूपेण परिचाल्यमानस्य, भारतीयराष्ट्रजनानां वैदेशिक-धर्मान्तरकरणाभियानस्य निरोधाय गिरिवासि-वनवासि -सीमावासि जनेषु भारतीय-संस्कृतिनिष्ठा-प्रतिष्ठायै संस्कृतप्रचारकाणां नियोजनस्य सुपरिष्कृता योजनैका अचिरात् निर्धारणीया । तदनुसारञ्च तत्र-तत्र उपर्युक्त-प्रदेशेषु तेषां प्रेषणेन धर्मान्तरकरणस्यायं व्याधि : शीघ्रतिशीघ्रं परिहरणीयः ।

अनुमोदकः श्री पं०दामोदर शर्माणः नेसं० वि०

सम्मेलनस्यांते एका कविगोष्ठी च जाता, यत्र श्रीगोविन्दपाण्डेय, शिवजी उपाध्याय, रमागोविन्दशर्मा श्रीकृष्णदेव प्रभृतयः कवयः सम्मिलिता अभवन् ।

एतादृशेषु सम्मेलनेषु स्वस्थविचारविनिमयस्यावसरः समुपलभ्यते । अतः समस्तं संकोचं विहाय संस्कृतसरस्वतीसमुपासकाः विश्वं संस्कृतं संविधातुमश्रान्तं सन्नद्धाः भवेयुरिति सूर्योदयसमीहा । ◆

# 卐 सूर्यविज्ञानसूत्रशतपत्रम् 卐

[प्राकाश्यं नीयन्ते सम्प्रति सूर्यविज्ञानसूत्राणि गुरुकृपापीयूषपरपारावारोमिरमणीयानि परावाचश्चारुतरचमत्क.ररोचिष्णुचित्राणि श्रीमद्भिश्चन्द्रशेखरस्वामिमहाभागैः सद्गुरुकृपायाः सहजसत्पात्रैः संवित्समुद्रसमवगाहनग्रहिलैः सूर्यस्पन्दसामरस्यरसिकैः प्रत्यक्षीकृतानि ।

एतेषां पराविज्ञानवेत्तॄणां विद्वद्वरेण्यानां महिमानं कामं माऽनुमापयतु साम्प्रतिको लोकः किन्तु एतया कालजयिन्या चिरन्तनचारुरुचिरया रचनया स्वयमेव तथ्यमिदं सुस्पष्टं परिलक्ष्यते यत् एतादृशा एव क्रान्तदर्शिनः आसन् महनीयाः महर्षयः सूत्रकाराः मनीषामूर्धन्याः पूर्वजाः । अधीतं मया स्वयमेतेषां मनीषिणां गुरुसन्निधौ साक्षात् सन्दृब्धाः प्रतितिथमवितथाः पृथ्वपार्थिवप्रथाप्रतिष्ठापकाः गुरुभिः गोपीनाथकविराज–नीमानन्दमहाराज–विशुद्धानन्द परमहंसमहाभागैः स्वयं गभस्तिमता च कथिताः समाधौ श्रुताः तत्क्षणमेव लिपिबद्धाः लेखाः । ध्यायं ध्यायं तत् धिषणाधौरेयत्वं स्मारं स्मारं तत् सूर्यसंविद्विज्ञान-गरिम्णः गुरुत्वम् ! सत्यम् समनुभूतं मया महाभावप्रामाण्यम्, श्रीमतश्चन्द्रशेखरस्वामिनः नवागमिकोपलब्धिमहत्वम् ।

सूर्योदय-पाठकेभ्यः समर्प्यते एतत् सूत्रशतपत्रम् सर्वप्रथमम् । समाहूयन्ते च विद्वांसः विषयेऽस्मिन् स्वकीय-सम्मति-सम्प्रेषणसमीक्षणपरीक्षणादिकार्थमिति शम् । सं०]

# अथ सूर्यविज्ञानसूत्रम्

## [प्रथमरश्मिः]

१–अथ सूर्यसंविदनुशासनम्
२–ॐ सूर्याय नमः
३–ॐ कलात्मने नमः
४–सूर्यरश्मिचक्रालोडनम् सूर्ययोगः
५–चक्रावलोडनमनुलोमक्रमेणैव
६–आत्मन्येव तत्
७–चक्रं मरीचिमण्डलम्
८–ओंकार एव केन्द्रम्
९–प्रणवस्तु स्वात्मस्वरूपः
१०–पञ्च शक्तिस्वरूपः
११–चिदानन्देच्छाज्ञानक्रियाः
१२–शक्तयः स्वात्मस्वरूपाः
१३–प्रणव एव सूर्यः
१४–व्यक्तकलास्वरूपाश्च
१५–नादबिन्दुकलात्मना त्रैविध्यं तस्य
१६–अव्यक्तप्रणवः शक्तिस्वरूपः
१७–पञ्चशक्त्यात्मा च
१८–व्यक्तस्य त्रैविध्यम्
१९–नादः स्वात्मस्वरूपरावः
२०–प्रणवस्य समानस्फुरणं नादः
२१–समानता नादसाम्यावस्था
२२–नादस्य विषमावस्था बिन्दुः
२३. वैषम्यानन्तरं साम्यम्
२४. बिन्दुक्षरणमेव कलास्वरूपम्
२५. क्षराक्षररूपेण बिन्दुर्द्वैविध्यम्
२६. क्षोभरहितोऽक्षरस्वरूपः
२७. बिन्दुक्षरणमेव कलनम्
२८. तदनन्तरं क्षोभः
२९. कलाः पञ्च षोडशादिभेदेन बहुधा
३०. कलासु केन्द्रे शक्तिः
३१. कलानां क्षरणं वृत्ताकारेण
३२. बिन्दुरूपेण व्यापकः
३३. शान्ति-प्रतिष्ठा-विद्या प्रवृत्ति-निवृत्तीनां व्याप्यव्यापकभावः ।
३४. अत्रैवाकुञ्चन-प्रसारण-धर्मस्याविर्भावः ।
३५. धर्मस्तु समष्टिस्वरूपः
३६. संकोचे सावयवत्वनिरवयवत्वे
३७. विकोचेऽपि तथा
३८. मात्रा भेदेनावयवभेदः

३९. पञ्चाशत् मात्रास्वरूपा रश्मिः

४०. रश्मीनामानन्त्यम्

४१. मात्रा-भेदेन रश्मिभेदः

४२. रश्म्यवयवसंघट्टनम् वर्णम्

४३. शुक्लत्वं सत्त्वस्वरूपम्

४४. तस्मात् रक्तवर्णाविर्भावः

४५. तस्मात् नीलवर्णता

४६. एतेषां मेलनात्वर्णानन्त्यम्

४७. कलाविन्दुरपि कार्यकारण-भेदेन द्विविधः

४८. कारणविन्दुरेवोपादानम्

४९. विश्वन्तु कार्यविन्दुरूपम्

५० मात्रा क्षणम्

५१. अर्धमात्रा अव्यक्तस्वभावात्मिका

५२. क्षणेन सह धर्मसम्बन्धः

५३. क्षणे सावयत्वनिरवयवत्वे

५४. क्षणाक्षणत्वयोः धर्मधर्मि-सम्बन्धः

५५. कलाः रेखात्मिकाः

५६. एतासां प्रसरणम् निःसरणञ्च युगपत्

५७. कलाया एका भ्रमिरेव क्षणम्

## द्वितीयरश्मिः

१. क्षणमात्राविवेक एव ज्ञानम्

२. मात्रायाम् सौक्ष्म्यम्

३. मात्रोदय स्पन्दात्मकः

४ ईषत् बहिश्चलनं मात्रा-स्पन्दः

५. अत्राप्यवयवावयविभावः

६. कारणमात्रा अवयविस्वरूपा

७. कार्यमात्रा अवयवस्वरूपा

८. चलनमेव स्फुरणम्

९. तत्र परिच्छेदराहित्यम्

१०. स्रोतः स्वरूपमेव चलनम्

११. प्रवाहनैरन्तर्य्यम्

१२. मात्रायाः अवयवविश्लेष-पर्यन्तावस्था एव धर्मः

१३. धर्मोदयः अवयवक्रमात्

१४. धर्मस्य बहि फुरणमेव परिणामः

१५. अत्र कारणसूक्ष्मस्थूलक्रमः

१६. परिणामः धर्मविन्दुः

१७. अयमेव कारणविन्दुः

१८ कारणात् कार्यविन्दुः

१९. तस्मात् सूक्ष्ममात्रावयव-स्फुरणम्

२०. धर्मपरिणामस्य स्थूलंरूपमेव मात्रावयवत्वम्

२१. बहिःस्फुरणं नियमेन

२२. अवयवानुशीलनमेवानुसन्धानम्

२३. अवयवलाभात् अवयविदर्शनम्

२४. ततः मात्रास्वरूपज्ञानम्

२५. अवयविज्ञानात् सर्वावयव-ज्ञानम्

२६. केन्द्रे

२७. अवयवचालनं सूर्यविज्ञानम्

२८. अत्रविशेषः

२९. वैशिष्ट्यादेवावयवज्ञानम्

३०. अवयवानां संकर्षणविकर्षणात् सृष्टिः

३१. अवयवेषु शश्वत् संकोच-विकोचौ

३२. एतेषु केन्द्रसत्ता

३३. अवयविन्यपि

३४. अवयवावयविदर्शनं विज्ञानम्

३५. तौ पञ्चाशत्

३७. स्वात्मस्वरूपत्वात्

३८. स्थितिः

३९. अत्रैव चालनशक्तिः

४०. धर्मे सदृशपरिणामिता

४१. चालनं स्पन्दाधीनम्

४२. एकस्यैव निरन्तरं बहिः स्फुरणम् सदृशपरिणामः

४३. साम्यावस्था

४४. क्षणसम्बन्धः

४५. धर्मनिष्ठावयवानां वृत्तगतिः

४६. सृष्ट्यवस्थायामनुलोमक्रमः

४७. वृत्तकेन्द्रे कलाशक्तिः

४८. अवयवानामाकर्षणम् संहारः

४९. कला विकला भवति

५०. अवयवैः सह सदृशपरिणाम-योग्या विकला

५१. सदृशपरिणामोऽपि यदा विसदृशः भवति

५२. वृत्ते विसदृशपरिणामिता

५३. अवयवानां वैषम्येन संघट्टः

५४. विषमसंघट्टनादाकारसृष्टिः

## तृतीयरश्मिः

१. मात्रासंघट्टनात् चक्रोत्पत्तिः

२. चक्रम् समष्टिरूपम्

३. चक्रचालकः आत्मा

४. व्यक्तप्रणवशक्तिरेव तत्र कारणम्

५. बोधतारतम्यात् संवेगः

६. तीव्रालोडनात् शुभ्रसत्त्वोद्रेकः

७. वेगानुसन्धानमेव तपः

८. अव्यक्त-प्रणवस्य शक्तिः कारणम्

९. गुरुप्रसादादुपलब्धिः

१०. अतिरहस्यत्वात्

११. गतिविज्ञानविदां सहजैव

१२. शक्तियुक्त आत्मा एव प्रेरकः

१३. प्रेरणैव बलम्

१४. बललाभात् मृत्युजितो भवति

१५. समष्टिस्वरूपबोधः

१६. चक्रे स्थितिलाभात् शुद्ध-सत्त्वदर्शनम्

१७. तत्रस्वात्मरूपबोधः

१८. बहिः क्षेपणं चक्रस्य

१९. तदा तत्र शक्त्याविर्भावः
२०. आत्मा तु द्रष्टृस्वरूपः
२१. द्रष्टृ भावेनानुसन्धानम्
२२. क्षेपणं नाम द्रष्टुरहंभावः
२३. चक्रम् स्वयं शक्तिमत्
२४. शरीरमपि चक्रम्
२५. स्थैर्यम् आलोडनात्
२६. सत्त्वदर्शनम्
२७. सत्त्वं ज्ञानात्मकम्
२८. संकोचविकासौ
२९. तस्य बहिःस्फुरणम्
३०. साम्यावस्था माया
३१. वैषम्यात् प्रकृतिः
३२. अत्राप्यवयवावयविभावः
३३. सत्त्वावयवानां संघट्टनात् रश्म्याविर्भावः
३४. साम्यवैषम्येऽत्र
३५. साम्यावस्थायां समानरश्मिः
३७. रश्मिसंघट्टनात् शुक्लवर्णः
३८. केन्द्रे विक्षोभः
३९. विक्षोभात् रक्तवर्णोद्रेकः
४०. रक्तवर्ण एव सृष्टिशक्ति भित्तिः
४१. रक्तवर्णएव प्रकृतिः
४२. अत्राप्यनुसन्धानम्
४३. शुद्धसत्त्वस्तु माया
४४. प्रणव एवाधिपतिः
४५. समष्टिव्यष्टिभावरूपं रश्मिषु
४६. रक्तस्वरूपा प्रकृतिरपि त्रिधा
४७. रक्तशुभ्रनीलभेदात्
४८. एकत्रैव वृत्तगत्यात्मकाः
४९. केन्द्रे सूर्यः
५०. सूर्यरश्मिस्फुरणात् युगपत् वर्णत्रैविध्यम्।
५१. रश्मिवर्णानामंशांशिभावः
५२. वर्णानामाश्रयः रश्मिसमूहः
५३. एकाकारवर्णाः समस्वरूपाः
५४. एतेषामपि रश्मिस्वरूपत्वम्।
५५. एतासामपि वर्णव्यपदेशः।
५६. वृत्ताकारेण बहिःस्फुरणम्
५७. आनन्त्यात्।
५८. वर्णास्तु भित्तिस्वरूपकाः
५९. नीलेवर्णेऽहंकाराविर्भावः।
६०. अहंकार एवात्मा
६१. नीलवर्णात्मकं गगनम्
६२. गगने नीलम्
६३. अस्य केन्द्रे नीलसूर्यः
६४. अकार, उकार, मकार सूर्याः
६५. अकारस्तु रक्तवर्णात्मकः
६६. उकारस्तु शुभ्रवर्णात्मकः
६७. मकारस्तु नीलवर्णात्मकः।
६८. नीलवर्णे समष्टिसूर्यः।
६९. एतदेव शून्यम्।
७०. गगनमेव भित्तिः।
७१. सर्वमत्रैव।
७२. तारतम्यतः विश्ववैचित्र्यम्
७३. नीलप्रकाशएव विश्वम्
७४. नीलवर्णमावरणम्
७५. अतएव गगनं नीलमत्युच्यते।
७६. अस्य शून्यम् इत्यापि संज्ञा।
७७. गगनंचिदात्मकम्।
७८. परमाणुसंघट्टनकार्ये रश्मिसमूह एव कारणम्

## चतुर्थरश्मिः

१. वर्णस्य केन्द्रे रश्मिसंघट्टः
२. तस्मात् प्रकाशपरमाणवः।
३. एतेन परमाणुषु आकर्षण-विकर्षणे।
४ एतेन परमाणुषु पुञ्जीभावः।
५. परमाणु पुञ्जोऽप्यवयवसमूहः।
६. तत्रापि संकर्षणविकर्षणे।
७. गतिरत्रापि
८. वर्णमेवास्य स्वरूपम्
९. रश्मिचालनं वर्णकेन्द्रे।
१०. तत्रापि प्रथमतः सरलागतिः।
११. स्पर्शान्तिरं वक्रगतिः।
१२. अत्यन्तरहस्यत्वात्
१३. गुरुकृपैव कारणम्
१४. वक्रगतिस्तु प्राक्सर्पाकारा
१५. पश्चात् कुण्डलिनीरूपा।
१६. कुण्डलिनी केन्द्रे स्वरूप-स्थापनम्।
१७. कुण्डलिनी वर्णात्मिका
१८. एतस्मात् वर्णपिण्डसृष्टिः।
१९. पिण्डे सूर्य एवात्मा।
२०. पिण्डस्तु शरीरमेव।
२१. कुण्डलिनिकेन्द्रे स्वात्म-स्वरूपबोधः।
२२. तत्रैव इच्छायाः स्फुरणम्
२३. महाशक्तिसम्बन्धात् वर्णानामाकारप्राप्तिः।
२४. आदौ केन्द्रे स्वात्मस्वरूपे-गतिः।
२५. वर्णात्मकस्योन्मेषः।
२६. कुण्डलिनीगत्यनुसारं बहिः स्फुरणम्।
२७. वर्णपिण्डे गतिगोपनम्।
२८. पिण्डस्थैर्यम्।
२९. सामान्येच्छा सम्बन्धेनाविर्भावस्तस्य।
३०. प्रकृतिरेवापूरयति
३१. प्रकृतिकेन्द्रे महाशक्तिः
३२. आमस्वरूपेण प्रेरको भवति।
३३. प्रेरणा रश्मिरूपेण
३४. स्वाभाविकत्वात्
३५. बहिः स्फुरणत्वम्।
३६. आकारेऽपि क्रमपरिणामः
३७. वर्णपिण्डस्य प्रकृतिपिण्डत्वम्

३८. प्रकृतिस्तु परिणाम स्वरूपिणी
३९. सूक्ष्माकारा
४०. रक्तवर्णप्रकृतौ सर्वेप्याकारा एकाकारेणैव ।
४१. तस्या केन्द्रे एव स्वरूपाविर्भावः
४२. अत्रैव पदार्थानां सामान्याकारः शुद्धत्वात् ।
४३. आकारानुसन्धानं विज्ञानेन गुरुप्रसादाद्वा ।
४४. परमाणुषु संकर्षणविकर्षणे ।
४५. तात्त्वमदृष्टिः
४६. क्रियानुसन्धानेन परमाणुज्ञानम् ।
४७. पिण्डस्तु परमाणुस्वरूपः ।
४८. परमाणूनामपि वृत्ताकारगति ।
४९. त्रिकोणमेवास्य योनिः ।
५०. तत्रैवानुसन्धानम् ।
५१. पदार्थस्तु परमाणुस्वरूपकः ।
५२. अत्राप्यवयवायवयिभावः ।
५३. अणवस्तु प्रकृतिस्वरूपकाः वर्णात्मकाश्च ।
५४. तेषां सादृश्यत्वेऽपि वैशिष्ट्यम् ।
५५. ते तु क्रियाशीलाः ।
५६. रश्मिचालने एवैतेषां वैलक्ष्यम् ।
५७. परमाणवोऽपि त्रिविधाः
५८. रक्तशुक्लनीलभेदात्
५९. वर्णतारताम्यात् सृष्टिवैचित्र्यम्
६०. सूर्यरश्मिसम्बन्धात् परमाणुषु घटनविघटने
६१. घटनम् सृष्टिकार्ये
६२. विघटनम् संहारे
६३. अत्रैवावधानम्
६४. रश्मिरेव कारणम्
६५. परमाणुद्वययोगात् महत्तत्त्वम्
६६. एकस्तु केन्द्रे स्थित्वेतरानाकर्षयति
६७. इदमेव बीजमित्युच्यते ।
६८. पश्चात् निरीक्षणम् ।
६९. परमाणवस्तु साकारनिराकारस्वरूपकाः
७०. पिण्डे रश्मिक्रिया ।
७१. रश्मितारतम्येण पिण्डेऽप्याकारवैचित्र्यम् ।
७२. समष्टिनदनेऽनुसन्धानम्
७३. तस्मात् रश्मिज्ञानम्
७४. एतेनैव पदार्थानाम् वैचित्र्यावबोधः
७५. वर्णास्तु साम्यभावेन सृष्टिकार्ये उपादान स्वरूपाः ।
७७. एतेषामधिपस्त्वीश्वरः ।
७८. समष्टिः नादसम्बोधः ।
७९. तत्रैव पदार्थः रश्मिस्वरूपः ।
८०. रहस्यरूपक्रिया तु द्विविधा ।
८१. वर्णानुसन्धानात्मिका
८२. वर्णराश्यनुसन्धान - क्रियाचेतिक्रमः ।
८३. सदृशपरिणामः रूपे ।

## पंचम-रश्मिः

१. समष्टिनादे बैखरी क्षेपणम्
२. तत्र नादात्मकः परिणामः
३. पिण्डस्पर्शस्तु नादात्मकरश्मिरूपेण
५. इच्छारूपेण स्पर्शः
६. पिण्डस्यकेन्द्रे रश्मिपातः
७. पिण्डः प्रकाशस्वरूपः
८. केन्द्रे स्थित्वोर्ध्वाधःगतिचालनम्
९. तदा पिण्डे गतिः
१०. स्पष्टवर्णत्वम्
११. स्वात्मस्वरूपेणाभिव्यक्तिः
१२. संकोचविकासौ च
१३. वर्णात्मवृत्तो त्रिकोणम्
१४. तत्रापि वृत्तत्रयम्
१५. प्रथमवृत्तभ्रमिः विलोमक्रमेण
१६. द्वितीयस्त्वनुलोमक्रमेण
१७. तृतीयः स्थिरस्वरूपकम्
१८. केन्द्रे रश्मिपातः
१९. वर्णतादात्म्यम्
२०. तत्राकाराविर्भाव:
२१. रहस्यात्मकः
२२. अव्यक्तरश्मिसंस्थानंपिण्डे
२३. केन्द्रे आकारेणैव रश्मियोजनम्
२४. प्रत्येकवस्तुरश्मिवैचित्र्यम्
२५. पिण्डे सामान्यरश्मिस्पर्शः
२६. रश्मिपाते क्रमः
२७. तत्रापि नियमः
२८. सरलगत्या रश्मिचालनम्
२९. वर्णपिण्डयोश्च
३०. रश्मयः गतिशीलाः
३१. पिण्डरश्मिमेलनम् संघट्टः
३२. नियतरश्मिसंघट्टनेनाकाराविर्भावः
३३. ज्ञानात्मिका स्थितिः
३४. रश्मिचालनम् रहस्यात्मकम्
३५. तत्र त्रैविध्यम्
३६. क्रमादेव
३७. तदा पिण्डे वर्णोत्पत्तिः
३८. पिण्डस्य स्थैर्ये वर्णरूपेण
३९. तत्र प्रथमं शुक्लरश्मिपातः
४०. सामान्यशब्दस्य बोधात्मकमनुसन्धानम्
४१. तत्र रश्मिपरिचर्या
४२. चक्रस्यविलोमक्रमेणालोडनम्

४३. तदा रश्मिस्वरूपेण स्थैर्यम्
४४. तत्र स्वरूपस्वात्मावबोधः
४५. वर्णकेन्द्रे विन्दुः
४६. तस्य स्थैर्यम्
४७. मात्रावैलक्षण्यज्ञानात् रश्मिज्ञानम्
४८. मात्रावैचित्र्यात् रश्मिवैचित्र्यम्
४९. केन्द्रे रश्मिसमूहः
५०. पिण्डस्यकेन्द्रे बोधरूपेणस्थितिः
५१. वीक्षणम् स्वात्मरूपेण
५२. कृत्स्नतया वा
५३. इच्छायां स्थित्वा सामान्यरूपेण वीक्षणम्
५४. तत्र स्वरूपावस्थानम्
५५. आकारस्यापि
५६. अनियतकारणाविर्भावः
५७. इच्छाशक्तिसंकोचे सविशेषेच्छाविर्भावः
५८. तस्याः समष्टिरूपत्वम्
५९. पिण्डे सामान्याकाराविर्भावः
६०. वृत्तात्मकः
६१. पिण्डस्तु मातृकारूपः
६२. तत्र वर्त्तुलाकारा गतिः
६३. स्वरमातृकाः शुभ्रवर्णात्मिकाः
६४. केन्द्रे स्थित्वा निरीक्षणम्
६५. सरलगतिचालनम्
६६. तत्र शुभ्रवर्णमातृकायोजनम्
६७. समपरिमाणेन मातृकाचालनम्
६८. अहमात्मकम्
६९. समष्टिमातृका योजनम्
७०. बहिः स्फुरणम्
७१. पिण्डस्तु गोलाकारः
७२. तत्र पुनः रश्म्यनुसन्धानम्

७३. गोलकेऽपि गतिः
७४. रश्मिद्वारा आकर्षणम्
७५. इच्छानुसारं ह्रस्वदीर्घत्वतम्
७६. केन्द्रे तत्र स्वात्मावभावनम्
७७. तत्रापि वर्णात्मकः आकारः
७८. शुभ्रवर्णमातृकोद्धारः
७९. तासां लोमानुलोमक्रमेण चालनम्
८०. शुभ्रवर्णस्यापि संकोचविकासौ
८१. मातृकासंकोचे वर्णसंकोचः
८२. तस्याः विकासे वर्णविकासः
८३. तत्रैव वर्णशक्तिसम्बन्धः
८४. संकोचात् जगत्
८५. संहृतिश्च
८६. केन्द्रे वैलक्षण्यम्
८७. वर्णानां समष्टिबोधः
८८. एकस्मिन् कमले सर्वेषां स्थितिः
८९. तत्रवर्णशक्तेः सामान्यस्वरूपम्
९०. वर्णशक्तीनां वर्णसम्बन्धः
९१. वर्णपिण्डः सप्तधा
९२. स्वात्मस्वरूपेणाभिव्यक्तिः
९३. मातृकाशक्तिरेव वर्णप्रसूः
९४. अतएव सा माता
९५. वर्णेषु पञ्चाशद्देवताः-अकारात्हकारपर्यन्तम्
९६. वर्णशक्तिस्वरूपाणां मिथः वैलक्षण्यम्
९७. कलायुक्तास्ताः
९८. स्वकलां केन्द्रे प्रतिष्ठापयन्ति
९९. वर्णरूपेण स्वात्मानं प्रकटयन्ति

## षष्ठरश्मिः

१. वर्ण पिण्डस्य त्रैविध्यम्
२. रक्तवर्णोऽपि मातृकासंघट्टः
३. नीलवर्णेऽपि तथा
४. त्रिविधवर्णसमष्टिः भूतपिण्डः
५. स्वात्मस्वरूपेणोच्चारः
६. तदा समष्टिवर्णे सावधानता
७. केन्द्रे शुभ्रवर्णम्
८. केद्रे सूक्ष्मरन्ध्रम्
९. अत्रानुसन्धानम्
१०. मातृकाणां वृत्तगोले स्थितिः
११. वर्णमातृकाणां परस्परं मेलनम्
१२. अनन्तवर्णाणामेकता
१३. परस्परमिश्रणम्
१४. इयमेव वर्णप्रकृतिः
१५. ओंकारोऽपि वर्णात्मकः
१६. वर्णमातृकानुसन्धानन्तु वृत्ताकारेण
१७. एतेषां त्रैविध्यं स्वरूपेण
१८. केन्द्रे शुभ्रवर्णम्
१९. तत्रानुसन्धानम्
२०. पिण्डस्तु स्वात्मस्वरूपकः
२१. वृत्ताकारेण विकासः
२२. संकोचोऽपि तथैव
२३. वर्णपरिणामः रन्ध्रे दृष्टिनिक्षेपात्
२४. विकासः वर्त्तुलः
२५. एकक्षणे वर्णत्रयाणामनुभवः
२६. पिण्डएवाधारः
२७. सर्वे वर्णः व्यक्तमातृकामयाः
२८. व्यक्तमातृकास्वरूपः पिण्डः
२९. नीलवर्णेऽपि रन्ध्रम्
३०. अस्यामपि संकोचविकासौ
३१. नीलं गगनम्
३२. नीलवर्णं छायात्मकम्
३३. नीलवर्णपरिणतिस्तु विकृतिः
३४. छायायां स्वात्मबोधः
३५. छायायां सर्वम्
३६. अतएवास्याः आधारत्वम्
३७. अत्राप्यनुसंधानम्

३८. छायायां पदार्थोत्पत्तिः
३९. तत्र पिण्डरश्मीणां मातृ-रूपेणसम्बन्धः
४०. अतएव तत्र स्थूलत्वम्
४१. इयमेव सृष्टिः
४२. स्वात्मस्वरूपवर्णे सर्वम्
४३. आकारविशेषः छाया
४४. छायाकारः मूलाकारः
४५. आकारपरिणामः काल-चक्राधीनः
४६. काल एव कलयति
४७. प्रथमतः क्षणादेव सम्बन्धः
४८. क्षणस्यापि अनुलोमगतिः
४९. कुण्डलिनीरूपा गतिश्च

## सप्तमरश्मिः

१. नीलवर्णमेवावरणम्
२. अतएवास्य छायात्वेन प्रति-पादनम्
३. छायायामेव संसारः
४. अत्र भेदाभेदव्यवहारः
५. गतिरपि स्थितिवद् भाति
६. स्थितिरपि चेतनाभिन्ना
७. चेतनोऽपि जड़वद् भाति
८. विपरीत बोधः
९. संकुचितस्वरूपबोध एव जडत्वम्
१०. चेतनातिरिक्तम् न्यान्यत् किञ्चित्
११. छाया केन्द्रे परमाणुचालनम्
१२. अत्रैव परमाणुसृष्टिः
१३. छाया पिण्डे सकलपरमाणूनां
१४. परमाणवः सूक्ष्मतमाः
१५. सदृशस्वरूपाः
१६. तथापि सर्वेषां वैशिष्टयम्
१७. छाया पिण्डेऽनन्तपरमाणवः
१८. पिण्डे स्वात्मस्वरूपेणैतेषां ज्ञानम्
१९. परमाणुज्ञानात् सृष्टिशक्तिः
२०. ज्ञानगम्याः परमाणवः
२१. प्रत्येकपरमाणौ अनन्ता आकाराः
२२. परमाणुष्वपि अवयवावय-विभावः
२३. अत्रात्मानुसन्धानम्
२४. प्रक्रियाविशेषः
२५. ज्ञानात्मकत्वेन सर्वेन्द्रिय-व्यवहारः
२६. परमाणुविवेकस्तु ज्ञानिनाम्
२७. परमाणवोऽपि वर्णात्मकाः
२८. नीलवर्णप्रधानाः
२९. नीलवर्णे अव्यक्तस्वरूपेण स्थिताः
३०. नीलवर्णमेवाधारः
३१. छायापिण्डस्य केन्द्रे नील-वर्णम्
३२. परमाणवस्तु पञ्च सूक्ष्म-भूतात्मकाः
३३. एतेषामिन्द्रियप्रत्यक्षत्वम् मानसप्रत्यक्षत्वं वा नास्ति
३४. ज्ञानगोचरत्वमेव तत्र
३५. अतएव ज्ञानात्मकाः पर-माणवः
३६. तेषां द्विविधा गतिः
३७. नीलवर्णस्तु सागरसदृशः
३८. तत्रैवानन्तानन्तपरमाणवः
३९. परमाणवः साकारा अपि
४०. आकारस्तु अणुविशेषः
४१. पञ्चभूतात्मकाः वर्णपर-माणवः
४२. अतएव तेषां वर्णात्मकत्वम्
४३. अत्रैव वर्णमातृकाणाम् पर-माणु मातृकाणां घटनम्
४३क—परमाणूनाञ्च परस्परं सम्बन्धः
४४. मातृकास्वरूपाः परमाणवः
४५. मातृकाधीनास्ते
४६. मातृकास्वरूपेण विकासः
४७. अत्र मातृकाणां ध्वनि-विशेषेण परमाणुषु परिणामः
४८. संकोचः विकासश्च
४९. तद्यथा 'क' मातृकासम्बन्धेन 'क' परमाणुः
५०. परमाणुषु सूक्ष्मानुसन्धानम्
५१. नीलवर्णे
५२. केन्द्रे
५३. मातृकोच्चारणे परमाणूनां एकत्र संघट्टनम्
५४. सदैव गतिशीलत्वात्
५५. तत्र स्थैर्यम् प्रयत्नात्
५६. परमाण्वाधानम्
५७. विज्ञानबलाच्च स्थैर्यम्
५८. परमाणुष्वव्यवहितत्वम्
५९. एकास्मिन् परमाणौ सर्वं तिष्ठति
६०. एतेषां केन्द्रे महाशक्तिः
६१. मातृकासम्बन्धे परमाणुषु शब्दसम्बन्धः
६२. शब्दस्तु गत्यात्मकः
६३. गत्याकारा एव मातृका
६४. आकारेण परमाणुसम्बन्धः
६५. तेनैव परमाणूनां वैचित्र्यम्
६६. केन्द्रे सर्वम्
६७. नीलवर्णे एव परमाणूनां संयोगः
६८. परमाणुविवेकः ज्ञानम्
६९. ज्ञानबलादेव विवेकः

७०. भूतेष्वपि पञ्चाशत् परमाणवः
७१. ते सर्वे वर्णात्मकाः अणुरूपाश्च
७२. सक्रियाः बीजरूपाश्च कार्यं कुर्वन्ति
७३. परमाणुषु वृत्तगतिः
७४. तत्रैव चालनम्
७५. तदा स्थैर्यम्

## अष्टमरश्मिः

१. परमाणवोऽनन्ताः
२. तथापि पञ्चाशत् भेदभिन्नाः
३. प्रत्येकवर्णेऽपि पञ्चाशत् भेदप्रथा
४. परमाणुषु नदनम्
५. तत्तु स्वात्मस्वरूपकम्
६. एतेषां क्षणादेव बहिरन्तः संचारः
७. नीलेवर्णे एव
८. नीलवर्णे वैखरीशब्दस्य प्रक्षेपणेन तादृशार्थसमुद्भावनम्
८. क-रक्ताकारपरमाणवोऽपि
९. श्वेतवर्णेपरमाणवोऽपि
१०. परस्पर मिलिताः क्षोभमुत्पादयन्ति
११. ज्ञानबलादेव विवेकः
१२. परमाणुविवेकादेव सृष्टिबलम्
१३. एतेषां हृदयेऽव्यक्तनादः
१४. स्वात्मस्वरूपेण नदनम्
१५. नदनस्य सम्बन्धः मातृकाशक्तिसहितः
१६. मातृकास्पर्शादेव परमाणुषुक्षोभः
१७. मातृकाचालनम् युगपदेव
१८. अन्यथा परमाणुसंघट्टनाभावः
१९. वृत्ताकारे वर्त्तुलाकारागतिः
२०. मातृकागतिश्च
२१. परमाणुगतिश्च वर्तुलाकारा
२२ मातृकामध्ये परमाणु व्यापारः
२३. परमाणुषु सदृशः परिणामः
२४. सदृशानन्तपरमाणूनामुत्पत्तिः
२५. केन्द्रे मूलपरमाणुः
२६. मातृकावृत्ती संघट्टनम्
२७. उच्चारणबलेन परमाणुषु स्थैर्यम्
२८. वृत्तगत्या केन्द्रे योजनम्
२९. केन्द्रे चलनम्
३०. रहस्यात्मकम्
३१. तत्र स्थित्या सर्वाकर्षणम्
३२. स्वानुकूलम्
३३. स्फुरणञ्च
३४. अत्र स्थैर्यम्
३५. प्रतिपरिमाणु वर्तुलागतिः
३६. तदाकर्षणम् मातृकाभिः
३७. 'अ' केन्द्रे तेषामाकर्षणम्
३८. केन्द्रे एकात्मना 'अ' परमाणूनां स्थितिः
३९. तथैव सर्वमातृकाणाम्
४०. परमाणुप्रेरकस्तु मातृकायुक्तात्मा
४१ मातृका परमाण्वोः नित्यः सम्बन्धः
४२. मातृकास्वरूपः वृत्ते वर्तुलः
४३. तत्रैवाकर्षणविकर्षणे
४४. प्रेरक एव केन्द्रे स्थित्वा तथा करोति
४५. भूतपरमाणूनां सम्बन्धेन सामान्यभूतोत्पत्तिः
४६. सर्वेऽपि भूताः मातृकासम्बद्धाः
४७. पञ्चाशत्मातृकाणां बीजसम्बन्धः
४८. आकाशादिक्षितिपर्यन्तम् मातृकासम्बन्धः
४९. ज्ञानबलादेव लक्ष्यन्ते
५०. ज्ञानप्रत्यक्षाः पञ्चभूताः
५१. बीजमातृकाणामाकाशादिसम्बन्धेन तदुत्पादकत्वम्
५२. अतएव मातृकाबीजादेवभूतोत्पत्तिः
५३. प्रथमतः परमाणव एव स्वरूपेणाविर्भवन्ति
५४. अतएव तेषां भूतपरमाणवः इति संज्ञा
५५. अव्यक्तमातृकाः वर्णात्मकाः
५६. व्यक्तमातृकाणाम् भूतपरमाणुषु सम्बन्धः
५७. मातृकाः भूतपरमाणुषु क्षोभमुत्पादयन्ति
५८. परमाणवः स्वरूपविशिष्टाः
५९. सजातीयाः विजातीयाश्च
६०. परमाणुधर्मस्तु आकर्षणविकर्षणयुक्तः
६१. आकर्षणे विकर्षणेच समर्थः एव प्रेरकः
६२. सृष्टिकार्ये परमाणूनामाकर्षणम्
६३ संहारे विकर्षणम्
६४. केन्द्रेएव तेषामाकर्षणम्
६५. केन्द्रेभूतपरमाणूनां संघट्टनम्
६६. तत्रापि वृत्ते वर्तुलाकारा गतिः
६७. केन्द्रे मातृकाशब्दयोजनम्
६८. परमाणुषु भूतक्रिया
६९. भूतपरमाणु संघट्टनेनैव भूततन्मात्रादीनां सृष्टिः

७०. भूतपरमाणूनां वैशिष्ट्यम्
७१. आकाशमातृकाणां बहिस्फुरणम्
७२. अत्र नास्ति प्रतिघातधर्मः
७३. व्यापकत्वात्
७४. व्यापकत्वेन भूतात्मकत्वम्
७५. भूततन्मात्रपरमाणूनां स्थूलभूतपरमाणु पर्यन्तं विकासः
७६. स्थूलपरमाणौ च वर्तुलाकारागतिश्च निरवधिका इति
७७. महाह्रदः
७८. अत्रानुसन्धानेन चिदाकाशे स्थितिः
७९. भूततन्मात्रपरमाणुषु न गुणाविर्भावः
८०. अव्यक्तत्वात्
८१. स्थूलपरमाणुषु गुणाविर्भावः
८२. तेन परमाणुयामलत्वम्
८३. परमाणुछायायामलीभावः
८४. विन्दुपरमाणुश्च
८५. द्विविन्दुकः
८६. द्वयोरपि वर्तुलगत्या सम्बन्धः
८७. द्वयोरपि वामदक्षिणगतिः
८८. आभासपरमाणुद्वयणुकत्वम्
८९. एकस्मिन्नाकाशपरमाणौ सर्वे प्याकाशपरमाणवः
९०. तत्र यामलत्वमेवाभासपरमाणुत्वम्
९१. आकाशपरमाणूनां स्वात्मस्वरूपबोधः


## नवमरश्मिः


१. आभासपरमाणाणूनां भूतव्यपदेशः
२. परमाणुप्रभावेण मातृकाशक्तिसंकोचः
३. आकाशेऽपि भूतपरमाणूनां एकाकारेण स्थितिः
४. सर्वं सर्वात्मकम्
५. इतरभूतपरमाणुष्वपि सार्वात्म्यम्
६. भूतपरमाणूनां ज्ञानजप्रत्यक्षत्वम्
७. परमाणुषु भूताभासपरमाणवोऽपि
८. आकाश परमाणवः
९. केन्द्रे स्वात्मस्वरूपावबोधः
१०. एतस्मात् वायुपरमाणूनामाविर्भावः
११. तत्र परमाणूनां गतिचालनम्
१२. परमाणुद्वयकेन्द्रे वक्रगतिः
१३. आकाशपरमाणौ स्थैर्यम्
१४. आकाशसमष्टिपरमाणुषु केन्द्रानुसन्धानम्
१५. तत्रापि सर्वत्र एकाकारता
१६. आकाशकेन्द्रस्थितपरमाणूनां बहिःस्फुरणम्
१७. तस्माद्वायुपरमाणवः
१८. एतेषु वर्णवैशिष्ट्यम्
१९. वृत्तरहितत्वात् वायोः सदैव चालनम्
२०. आकाश एवास्याधारः
२१. आकाशपरमाणवः सदैवाश्रयभूताः
२२. सृष्टिप्रक्रियावसरे सर्वेषां परमाणूनाम् एकत्रैव स्थापनम्
२३. आकाश एव वायुपरमाणूनां केन्द्रम्
२४. आभासपरमाणुबोधः
२५. आभासपरमाणव एव वायुकेन्द्रस्वरूपाः
२६. वायोः केन्द्रे तेजः परमाणवः
२७. तत्राप्याभासपरमणुसम्बन्धः
२८. परिणामिनः
२९. त एव पदार्थस्वरूपाः
३०. भूतमातृकाणां भूतसम्बन्धः
३१. 'अ' मातृकाणामपि
३२. तत्र वर्त्तुलाकारा गतिः
३३. अप्स्वपि पूर्ववत्
३४. एतेभ्यः गुणाविर्भावः
३५. एतेषां केन्द्रे पृथ्वीमातृकापरमाणवः
३६. तत्र परमाणूनां वैचित्र्यम्
३७. परस्परमाकर्षणविकर्षणात्मना तेषां महाशक्तिस्वरूपत्वम्
३८. वर्त्तुलाकारावृत्तगतिस्तत्र
३९. आकर्षणविकर्षणे परमाणुस्वभावे
४०. सृष्टिपरमाणव आकर्षणप्रधानाः
४१. विकर्षणप्रधानाः संहारपरमाणवः
४२. आभासपरमाणूनां सर्वत्र सम्बन्धः
४३. वर्णानामपि साम्यम्
४४. परमाणुषु सर्ववर्णत्वम्
४५. पार्थिवपरमाणुषु गुरुत्वम्
४६. आभासपरमाणुषु जडत्वम्
४७. चिदात्मकपरमाणुषु चिन्मयत्वम्
४८. एतेषु परस्परं संघर्षः
४९. आभासपरमाणवः विश्वात्मका
५०. आभासपरमाणुषु चालनम्ः
५१. हृदयात् बहिःस्फुरणम्
५२. ईदृस्फुरणमेव विश्वम्
५३. आभासपरमाणुषु गुणत्रैविध्यम्
५४. बहिःस्फुरणसमये एतेषां चालनम्

५५. परस्परं सापेक्षगतिः
५६. केन्द्रे स्थैर्यम्
५७. तत्रस्थित्वा गति चालनम्
५८. आभासपरमाणुत्रयसंयोगात् महत्तत्त्वम्
५९. प्रत्याभासपरमाणु मातृकाशक्तिः
६०. आभासमातृकासम्बन्धेनाभिव्यक्तिः
६१. महत्तत्त्वे पञ्चभूतपरमाणवः
६२. केन्द्रे
६३. तत्राभासपरमाणुचालनम्
६४. आकाशाभासपरमाणूनां महत्तत्त्वेऽपि चालनम्
६५. तदाभूताकाशः
६६. ततोऽहंकारः
६७. केन्द्रे स्थितः सर्वं पश्यति
६८. महत्तत्त्वेऽहंकारसंबन्धः
६९. अहंकारो नाम परमाणुतादात्म्यम्
७०. एवं गतिचालनम्
७१. अतिरहस्यम्
७२. अत्रापि वृत्ताकारागतिः
७३. प्रत्याभासपरमाणु वर्त्तुलाकारा गतिः
७४. विलोमानुलोमात्मकः क्रमः
७५. तत्र स्थैर्यम्
७६. तदा बहिः रश्मिचालनम्
७७. आभासपरमाणूनामेकत्र स्थितिः
७८. सदैव तेषां बहिश्चालनम्
७९. एकत्रैव गतिचालनम्
८०. आभासपरमाणूनां बहिःस्फुरणम्
८१. परस्परमाकर्षविकर्षणञ्च
८२. तदा तत्र पुनः गतिचालनम्
८३. अनन्तवर्त्तुलाकारा गतिः
८४. तदा तत्रैवाकारविशेषः

## दशमरश्मिः

१. कालचक्रे आभासपरमाणूनां परिणामः
२. केंद्रे एकस्य स्थैर्यम्
३. अन्येषां परमाणुपरिणामः वक्रगतिश्च
४. वक्रगत्या इतरगतिचालनम्
५. तदा तेषाम् बहिः स्फुरणम्
६. वक्रगत्या एव विश्वस्यानन्त्यम्
७. तत्रप्याभासपरमाणूनां सघट्टः
८. तदा तेषु सावयवत्वम्
९. सावयवत्वेनाणूनामाविर्भावः
१०. एतेप्यनन्ताः
११. अणुषु सदैव वक्रगतिः
१२. केन्द्रे आभासपरमाणुः
१३. अणूनामपि वर्णात्मकत्वम्
१४. अणुष्वाकर्षणविकर्षणे
१५. महाशक्तिरूपत्वात् एतेष्वपि
१६. सदैव वक्राकारेण संघट्टः
१७. प्रत्येकाणुस्वरूपस्य सदैवाकापर्गत्वम्
१८. वैशिष्टयञ्च
१९. सामान्यत्वेन संघट्टः
२०. विशेषत्वेनाणूनमेकत्राकर्षणविकर्षणे
२१. तदा एकत्रैव गतिस्वरूपद्वयम्
२२. तदाभूताणु इति संज्ञा
२३. अणुद्वयसंयोगेन भूताकारता
२४. वर्णस्याविर्भावः
२५. अत्रैव सप्तवर्णसम्बन्धः
२६. भिन्नतया भानम्
२७. भिन्नाभिन्नरूपेणापि
२८. वर्णस्वरूपभूताणवः
२९. एते सर्वेऽपि नियतरूपकाः
३०. अणुत्रयेणाकारः
३१. वर्णात्मिकाणुरेवास्य केन्द्रम्
३२. महाशक्तिस्वरूपमेव सर्वम्
३३. समानवर्णाणु-संघट्टनेन समानवर्णेभ्यः आकारः
३४. विषमवर्णानुसंघट्टनात् वैचित्र्यम्
३५. भूताणूनां सम्बन्धः
३६. तेषु सप्तवर्णात्मकत्वम्
३७. सर्वं सर्वात्मकम्
३८. वर्णभूताणूनां परस्परं संघट्टः
३९. तत्रैवानन्तवैचित्र्यम्
४०. श्वेतवर्णानामेव केन्द्रम्
४१. तत्रैव रक्तवर्णस्यापि
४२. अत्रतत्र गतियुक्तवृत्त स्वरूपः
४३. वृत्तवर्त्तुलाकारेण भूत परमाणूनामुत्पत्तिः
४४. एकस्मिन् स्थले सर्वेषां साम्यावस्था
४५. आकाश वर्णाणूनां संघट्टः (तत्रैवानिलाणूनां सम्पर्कः) (तत्रैव पुनः वृत्ताकारा वर्तुला गतिः)
४६. वक्रगतिरेव कालचक्रस्य कारणम्
४७. काल चक्रे अणूनामविर्भावः
४८. वक्रगत्याणूनां गतिः
४९. तत्रापि सर्वेषामणूनां केन्द्रम्
५०. अणूनां सम्पर्कात् कालपरिमाणः
५१. कालपरिणामात् अणूनां वैचित्र्यम्
५२. अणुद्वयसंयोगात् भूताणुः
५३. भूताणूनां संघट्टनेनस्थूलाणुः
५४. स्थूलाणुषु वक्रगतिरेव केन्द्रे

५५. तत्र आकारसम्बन्धः
५६. कालचक्रकेन्द्रे महाकालः
५७. कालचक्रसम्बोध एव खण्ड कालकारणम्
५८. वक्रगतिबोध एव खण्डबोधः
५९. तदा सापेक्ष कालस्याविर्भावः
६०. महाकाले एव खण्डकाल-चक्रस्य गतिः
६१. स्थूलाणूनां सम्पर्कात् अवगतिः
६२. तत्रैव स्थूलाणुषु ममत्वम्
६३. इदमेवाहङ्कारः स्थूलाणु-संयोगात् 'संकुचित स्वरूपबोधः
६४. स्थूलाणु स्वरूपम् द्विविधिम्
६५. तत्राणुषु वक्राकारा गतिः
६६. वक्राकारेणु स्वरूपबोधः
६७. संकुचितबोधः
६८. इत्थं वक्राकारेण बहिः-स्फुरणम्
६९. तदा कालबोधस्तु चक्राकारेण
७०. कालचक्रस्य भूताणूनाम् सम्बन्धः
७१. कालचक्रस्य केन्द्रे काली-स्वरूपम्
७२. अत्र ! भूतमातृकास्वरूपम्
७३. भूतमातृकाणां भूताणूनांञ्च सम्बन्धः
७४. भूत मातृकाणां च परस्परं सम्बन्धः
७५. अत्रापि सर्वं सर्वात्मकम्
७६. भूताणवः वर्णयुक्ताः वक्रा-कारगतिस्वरूपाः, बहिः स्फुरणशीलाः
७७. कालचक्रेऽप्यनन्तचक्राणि ।
७८. मध्ये विकसिते बलसौभाग्य-लाभः
७९. कालेन कालस्य नाशः
८०. वक्रगतिषु पुनः वक्रगतिः
८१. विपरीतक्रमेण
८२. तदा विपरीत बोधः
८३. तत्रैव सर्वेष्वभिन्नाः
८४. भिन्नत्वेऽपि स्वात्मस्वरूपता
८५. त्रिभावास्तु जडाः
८६. प्रत्येकवक्रगतिमध्ये बिन्दुः
८७. वक्रतायाः तारतम्येण सृष्टिः
८८. तत्र संकुचितबोधः
८९. वक्रगतिस्थैर्यम् भूतसृष्टिः
९०. तत्र स्पन्दबोधभावः
९१. तत्रैव संसारित्वम्
९२. अत्र भूतपरिणामः
९३. कालेन खण्डसम्बन्धः
९४. तत्रैव परिणामः
९५. परिणामबलात् अनित्यः
९६. परिणामे विपरीतगतिरेव हृदयम्
९७. तत्रैव आकाराविर्भावः

## एकादश रश्मिः

१. शक्तिचक्रमेव कालचक्रस्य केन्द्रम्
२. प्रत्येकबिन्दुः वर्तुलाकारकः
३. अतएव बहिस्फुरणं भेद-बुद्धिश्च
४. भावात्मना कालचक्रस्य सम्बन्धः
५. इदमेव शक्तितत्त्वम्
६. महाशक्तिरश्मिरेव चक्र-शरीरम्
७. महाशक्तिचक्रस्य कालचक्रेण साकं सम्बन्धः
८. भूताणूनां व्यक्तस्वरूपमेव विश्वम्
९. कालसम्बन्धमवलम्ब्य
१०. भूताणूनामाविर्भावः
११. तत्र आकर्षणमेव केन्द्रशक्तिः
१२. विकर्षणस्यापि प्राधान्यम्
१३. विकर्षणबिन्दुरेव जडत्वम्
१४. तदा भेदेन बोधः
१५. विकर्षणबिन्दावेव जडत्वम्
१६. देशकालादीनां स्पन्दतारतम्यम्
१७. तेन कालदेशतारतम्यम्
१८. कालराहित्येन देशाभावः
१९. स्पन्दसत्त्वात् सर्वेषामस्तित्वम्
२०. भूताणूनामाकर्षण–विकर्षण-त्वेऽपि केन्द्रम्
२१. वृत्ताकारेणगतिः
२२. काले स्वात्मस्वरूपबोधः
२३. राग इति
२४. कालस्य प्रकृतिविकृतिरूप-परिणामः
२५. प्रकृतिपरिणामे स्वात्मना साम्यत्वेनाभासते
२६. विकृतिपरिणामस्तु वैषम्येण भाति
२७. वैषम्यात् स्थूलसूक्ष्मकारण-स्वरूपता
२८. वर्तुलाकारे वक्राकाराणुषु बोधः एव चित्तम्
२९. तदा बिन्दुद्वयस्य विपरीत-क्रमेण गतिः;चित्तव्यतिरिक्तम्
३०. जडो बिन्दु इत्यपि बोधः
३१. अत्राप्यनुसन्धानम्
३२. स्थूलाणुषु वर्णद्वयसम्बन्धः
३३. परस्परमाकर्षणविकर्षणत्वम्
३४. अत्रैव पञ्चबिन्दुत्वम्
३५. स्फुरणं वर्तुलाकारम्
३६. तदा बहिः स्फुरणम्
३७. युगपत् बहिरन्तः स्फुरणम्

३८. तत्र प्राणे सम्बन्धः
३९. वर्तुलाकारगत्यां सरलागतिश्च
४०. प्राणस्य वक्राकारेण नानात्वम्
४१. अणुषु प्राणसम्बन्धः
४२. तत्र प्राणस्यापि वक्राकाराणुत्वम्
४३. तत्र केन्द्रसापेक्षगतिः
४४. तत्र सापेक्षगत्यात्मकत्वेनाकर्षणविकर्षणे
४५. अतएवास्य वक्राकारा गतिः
४६. विपरीतभेदबुध्यावबोधः
४७. आकाशाणूनां सघट्ट एवाकाशः महाणूनां पुनः बहिःस्फुरणमाकाश इति
४८. आकाशादिक्रमेण भूताणूनां संघट्टनात् भूतोत्पत्तिः
४९. तेषु केन्द्रेषु समष्टिस्वरूपस्वात्मावबोधः
५०. अतएव भूताभासकेन्द्रम्
५१. चित् तत्त्वमिति
५२. महाशक्तिसंकोच एव भूतत्वम्
५३. पञ्चभूतेषु लीनस्वरूप एवाहङ्कारः
५४. स्वात्मस्वरूप एव भूताणुत्वेनाविर्भवति
५५. भूतानामाविर्भावः द्विविधः
५६. सामान्यः विशिष्टश्च
५७. भूतात्मत्वेऽपि गतिद्वयम्
५८. भूताणूनां परस्परं सम्बन्धः
५९. अणुषु मन्दगतिस्वरूपत्वम् जडत्वम्
६०. अतएव भूतानां स्थैर्यबलेन भानम्
६१. अहंकारस्य पुनः संकोचात् विषयत्वम्
६२. अत्रैव भेदबुद्धिः
६३. स्वात्मत्वेन स्थितस्य विषयस्य बहिश्चालनम्
६४. अहंकारद्वयम्
६५. तत्र विषमत्वेन हृदि स्थितस्य विषयस्य संकोचः
६६. विषमाहङ्कारस्य बिम्बप्रतिबिम्बभावः
६७ तत्र बिम्बग्रहणात् प्रतिबिम्बग्रहणम्
६८ बिम्बस्यापि वैचित्र्यम् सामान्य विशेषरूपकम्
६९. प्रतिबिम्बस्यापि
७०. अत्रैव विषयाभासः
७१. अत्रैव बिम्बरूपेणाकारतारतम्यम्
७२. तत्तु अहंकारे प्रतिफलति
७३. बिम्बाकार एव विषयस्य ज्ञानकारणत्वम्
७४. अहंकार एव पृष्ठभूमिः
७५. सर्वम् अहंकाराभिन्नत्वेन भाति
७६. अतएवास्य बिम्बपदेन व्यवहारः
७७. अत्रापि रहस्यम्
७८. आकाशादीनां बिम्बग्रहणं, तदनन्तरम् प्रतिबिम्ब स्वरूपं जगत्
७९. विषयस्य जडत्वम्
८०. संकोचात् इत्थं भवति
८१. विकासात् स्वरूपमेव
८२. अतएव सृष्टिः
८३. भूतानां बिम्बस्वरूपम् इन्द्रियत्वम्
८४. प्रतिबिम्बस्वरूपत्वम् विषयत्वम्
८५. अतएवात्रापि बिम्बप्रतिबिम्बभावः

## द्वादश रश्मिः

१. बिम्बविस्मृतिरेव जडत्वम्
२. अत्रैवभेदबुद्धिः
३. तदा विषयेन्द्रियभेदश्च
४. तदा परिमितप्रमातृस्वरूपः
५. अत्र वर्तुलाकारा गतिः
६. भूताणूनामप्यत्र वेगेन प्रकृतिप्रवाहात् बहिःस्फुरणम्
७. तदनन्तरं विकृतिः
८. विकृतौ जडत्वम् ।
९. अत्रैव विपरीतगतिः
१०. भूताणूनां बहिःस्फुरणम्
११. तत्रैव भेदबुद्धिः
१२. अकारस्य भूताकारत्वेनाभिव्यक्तिः
१३. विपरीत गत्यात्मनाकाशस्य जडत्वम्
१४. इत्थं संसारित्वम्
१५. विपरीतगतिसम्बन्धस्तु संकुचितरूपेण
१६. तस्मात् संवेगः
१७. तीव्रसंवेगात् केन्द्रेऽपि
१८. तस्य सम्बन्धः
१९. तदा संसारस्य भानम्
२०. तदा केन्द्रे एव सर्वमू नानात्वम्
२१ तत्र संकुचितइच्छास्वरूपम्
२२. इच्छाज्ञानाज्ञानयोभेदाभेदश्च
२३. क्रियायाः अभिव्यक्तिः

[ अत्राप्यनुसधानम् विपरीगत्यां सर्वमपि भवति । तत्रविपरीते स्वरूपबिन्दु स्वरूपेणैव सृष्टिः । बहिःस्फुरणसमये विपरीतविन्दुद्वयोः सम्बन्धः ]

२४. तदा पदार्थसृष्टि
(बिन्दुद्वयसंयोग एव)

२५. बहिः स्फुरणं कारणम्

२६. बिन्दुद्वयमेवपदार्थः

२७. बिन्दुद्वयवियोग एव संहारः

२८. आकारबिन्दुरेव मात्राकारेण परिणमते

२९. तदा तस्य स्थौल्यम्

३०. तदा तस्य गतिरपि जडात्मिका

३१. आकरबिन्दुरेव मायायां प्रविशति. मायाबिन्दुरपि तथा

३२. परस्परं प्रवेशानुप्रवेशात्

३३. स्थूलाकाररूपाविर्भाः

३४. तत्रैव कालस्यापि सम्बन्धः, देशस्यापि

३५. अत्राहमित्येवालम्

३६. बिन्दुद्वयसंयोग एव क्रिया-शक्तिः

३७. स्वात्मस्वरूपेणाहमिति स्थैर्यम्

३८. पश्चात् तत्स्वरूपेणान्यत्

३९. बिन्दुस्वरूपेण बहिस्फुरणम्

४०. प्रकृति विकृतिभावः

४१. तदा मूलबिन्दुराकर्षणात्

४२. तस्य वर्तुलाकारा गतिः

४३. प्रकृतिस्वरूपकेन्द्रे स्थैर्यम्

४४. विकृतिबिन्दुस्वरूपम्

४५ विकृतिस्वरूपत्वात्

४६. तत्र नानात्वम्

४७. नाना बिन्दूनाम् तत्रैव चालनम्

४८. अनन्तविन्दुरेवानंत्यकारणम्

४९. अतएवात्रापि सर्वं सर्वात्मकमेव

५०. बिन्दुरेव सर्वम्

५१. तस्याविर्भावः नानारूपेण

५२. माया एव कारणम्

५३. प्रकृति बिन्दुः स्थिरः, विकृति-विन्दुस्तु कालः

५४. अनुसम्बन्धम् परिणामानुभवः

५५. अतएव कारणादिक्रमेण इच्छास्वरूपेण स्थितः मावात्मकः पदार्थं एव राश्यादिक्रमेण स्फुरति ।

सूर्यः स्वात्मा सकलजगतां सृष्टिसार्वात्म्यबोधे,
दीप्यत्येकः नभसि नियतं देवतात्मा विवस्वान् ।
आत्मा देहे जडमपि जयी चेतनं संविधत्ते,
तत्त्वव्रातः निखिलभुवनस्यास्तु तस्मै प्रणामः ॥१॥

शैवं सिद्धान्ततत्त्वं करतलगतमेवार्यवर्यस्य यस्य,
आसीद्विश्वात्मभावे ह्यतिशयमहिता संस्थितिर्यस्य शश्वत् ।
सौ वं हंसः महार्हः सहृदयसुखदः विश्ववन्द्यः वरेण्यः,
गोपीनाथः प्रसिद्धः जयतु ममगुरुः सूर्यसिद्धान्तविज्ञः ॥२॥

साक्षात् सूर्यः समाधौ समधिकसदयः रश्मिरोचिष्णुरूपः,
कुर्वन्नालोकलोलां विकसितविभवां मे धियं दीप्तिदिव्याम् ।
चित्राभिः संविधाभिः अतिशयशमितां प्रेरयत् मे मनीषां,
निष्पन्नं येन सर्वम् लिपिलसितबलं सूर्यविज्ञानसूत्रम् ॥ ३ ॥

विशुद्धानन्दनामानं नीमानन्दं च सद्गुरुम् । प्रणमामि परामक्त्या कृतज्ञः कृतयेन्वहम् ॥ ४ ॥
येषां कृपायाः पीयूषं पायं पायं मनोहरम् । सूर्यविज्ञान सूत्राणां शतपत्रं विकासितम् ॥ ५ ॥
तीर्त्वा ह्यशुद्धमध्वानं, शुद्धेस्थित्वा शिवात्मकः । चितिमेवार्चयत्येभि-र्वचनैश्चन्द्रशेखरः ॥ ६ ॥

॥ इति द्वादशरश्म्यात्मकं सूर्यविज्ञानसूत्रम् शिवायोम् ॥

# कण्टकोद्धरणम्

—यन्० सि० वि० नरसिंहाचार्यमहोदयाः

यः कृपालू रावणादिकण्टकोद्धरणेच्छया ।
अवातरद्भुवं भूयस्समेऽस्तु शरणं प्रभुः ॥

ग्रन्थेषु पठ्यमानेषु पाठ्यमानेषु च मुद्रापकानवधानात् वा परिष्कर्त्रश्रद्धया वा अन्यतः कारणाद्वा यत्र तत्र लभ्यमाना अरुन्तुदा अपपाठा अध्येतॄणामतिमहतीं मनसो रुजमाव हन्ति। पाश्चात्यदेशेष्विव अस्मद्भारते परिष्कृतमुद्रणे घनव्ययः श्रद्धाधानं वा न क्रियते । अतो दोषा असंख्याकास्समापतन्ति । मया दृष्टेषु ग्रन्थेषु निर्णयसागरमुद्रालये मुद्रितायां चित्रमीमांसायां यावन्तोऽपपाठा अलक्ष्यन्त, तावन्तोऽन्यत्र नाऽदृश्यन्त । कालान्तरे तत्र विचारः प्रवर्त्यते । अत्र तु दशरूपके कुवलयानन्दे च दृष्टाः केचन अपपाठा विमृश्यन्ते । इमानि कटुकवचनान्युदीरयन्तं मां क्षाम्यन्तु सहृदयाः । विशिष्य यत्र प्राकृत गाथा भवन्ति उदाहरणार्थाः, तत्र तु बहुतरा दोषाः । पाठस्खालित्यानि बहुविधानि भवन्ति । तत्र च बहूनि परिहर्तुं शक्यन्ते, यदि प्रयत्नः कश्चन विधीयेत । यत्र मूले दोषो भवति, तस्यैव मूलपाठस्य व्याख्यां दृष्ट्वा स शोधयितुं शक्यते तस्योदाहरणाय किञ्चि त्प्रस्तूयते । प्रतापरुद्रीये मद्रपुरीमुद्रिते आन्ध्रलिप्यां ) पीठिकाभूते मूलग्रन्थे प्रवरसेनकृतात् सेतुबन्धात् काचन गाथा काव्यप्रयोजनसंवादाय उदधारि । सा गाथा—

'परिवड्ढइ विण्णाणं संभाविज्जइ,
जसो विडप्पंतिगुणा ।
सुव्वइ सुपुरिसचरिअं किं तं,
जेण ण हरन्ति कव्वालावा ॥ इति ।

तस्याः—'परिवर्धते विज्ञानं सम्भाव्यते,
यशो विसर्पन्ति गुणाः ।
श्रूयते सुपुरुषचरितं किं तद्येन,
न हरन्ति काव्यालापाः ॥

इति मुद्रिता छाया । अत्र सर्वं समीचीनमेव, "विसर्पन्ति' इति पदच्छायावर्जम् । 'विसर्पन्ति' इत्यस्य स्थाने 'अर्ज्यन्ते' इति भाव्यम् । यदि कुमार-स्वामि-सोमपीथिनो व्याख्यायामवधीयेत तर्हि प्रमादो न भवेदेव । तत्र 'अर्जेर्विडप्प' इति अर्ज धातोः विडपादेश इति लिखितम् । अर्थात् 'अर्ज' इत्यस्य स्थाने प्राकृते 'विडप्प' इत्यादेशो भवति । ततः अर्ज्यन्ते इति छाया भवितुमर्हति । गुणा अर्ज्यन्ते इति चार्थस्सङ्गत एव । व्याख्यानानवलोकनं प्रमादहेतुः ।

धनञ्जय विरचिते, १९४१ (सन) संवत्सरे निर्णयसागर-यन्त्रालय - मुद्रिते धनिकविरचितावलोकसहिते, अवलोकस्था सर्वप्रथमावतारिका इत्थमस्ति—

'इह सदाचारं प्रमाणयद्भिः अविघ्नेन प्रकरणस्य समाप्त्यर्थमिष्टयोः प्रकृताभिमतदेवतयोर्नमस्कारः क्रियते श्लोकद्वयेन' इति । अवतारितश्लोकद्वयन्तु—

'नमस्तस्यै गणेशाय यत्कण्ठः पुष्करायते ।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे ॥
दशरूपानुकारेण यस्य माद्यन्ति भावुकाः ।
नमस्सर्वविदे तस्मै विष्णवे भरताय च" ॥ इति ।

प्रथमः श्लोकः गणाधिपति-नमस्कारात्मकः, द्वितीयस्तु, तन्त्रेण (श्लेषेण) विष्णु-भरत-रूप-देवताद्वितयवन्द-

नार्थक इति चेति स्पष्टम्। ततश्च श्लोकद्वितयेन देवतात्रय नमस्कारे सिद्धि...'देवतयोर्नमस्कार...इति अवतारिका दृष्टं कथं सङ्गच्छते? अपिच 'सदाचारं प्रमाणयद्भिरिति बहुवचनं किमर्थम्? विशेष्यं वा॰ स्य किम्? चिरपरिशीलनेऽपि सङ्गतोऽर्थः न प्रतिभाति। व्याख्यातृभिरप्यत्र विचारो न प्रदर्शितः। परिष्करणाय प्रयत्नो नाकारि।

एवं स्थिते 'टोरण्टो' (केनडा) विश्वविद्यालये संस्कृत-प्राचार्यपदवीमधितिष्ठता मित्रमणिना श्रीवेङ्कटाचार्येण भट्टनृसिंहकृत-लघु-टीकया साकं सम्यक् परिष्कृत्य मुद्रिते दशरूपके इयं पङ्क्तिः हन्त सुबोधा समदृश्यत। प्रथम कवले मक्षिकापातः परिहृतः।

"सदाचारं प्रमाणयता अविघ्नेन प्रकरणसमाप्त्यर्थमिष्टाया देवतायाः, प्रकृताभिमतयोश्च देवतयो-र्नमस्कारः क्रियते कृतिना श्लोकद्वयेन इति स पाठः। परिशील्यतां संशयच्छेदिनी अवतारिका व्याख्या "अविघ्न-परिसमाप्ति-नमस्कारयोः फलफलिभावे सदाचारमेव प्रमाणीकरोतीति वदन्' त्रयाणामेव गणेशविष्णुभरतानां नमस्कार-प्रतिपादकतया एकार्थं श्लोकद्वयं युगपदेवोपपादयति 'सदाचार' मित्यादिना।......अविघ्नसमाप्त्यर्थमिष्ट-देवता गणेशः। स्वत एवाऽभिमता देवता विष्णुः। प्रकृतदेवता शास्त्र-प्रवर्तको भरतः।"—इति। अत्र देवता - नमस्कारस्य फलवत्तां कर्तव्यताम्, देवतात्रयवन्दनस्य प्राप्तकालतां उचिततां, श्लोकस्य द्वयस्य युगपदेवावतारणे हेतुमौचित्यञ्च संक्षेपेण निशदयन्ती, अवलोकस्याशयं विवृण्वती, सन्देहमपोहन्तीयं व्याख्यातृ-बुद्धिवैभवं प्रकाशयति।

दशरूपावलोके उदाहरणार्थमुपात्ताः विशिष्य प्राकृत-गाथाः संस्कृतच्छायाश्च असाधुपाठ-बहुला दृश्यन्ते! मुद्रण-दोषाश्च बहवस्सन्ति। द्वित्राण्युदाहरणानि; यथा—( सर्वत्र १९४१ ( सन् ) संवत्सरे निर्णय-सागर-मुद्रालय मुद्रितमेव दशरूपकं परामृश्यते )

१—"महु एहि किं णिवालअ हरसि णिअं
वाउ जइवि मे सिचयम्।
सहिमि कस्स सुन्दर, दूरे गामो अहं
एक्का॥" ( ५१ पृष्ठे )

छाया :—"मुहु रेहि किं निवारक
हरसि निजं वाचो यद्यपि मे सिचयम्।
साधयामि कस्य सुन्दर, दूरे
ग्रामोऽहमेका।"

इति सदोषैव मुद्रिता गाथा, छाया च अनवबोध-दुःस्था स्थापिता। नायिकायाः सहायिन्यः संख्यायन्ते। तत्र सन्दर्भे 'क्वचित् नायिकैव स्वयं दूती भवेदिति प्रतिपाद्य उदाहरणार्थमिय गाथा दत्ता गाथैव दुरवबोधा चेत्, स्वयं दूतीत्वलक्षणसमन्वयो दूरेऽपास्तः। मूलमेवं भवितुमर्हति।

'महुएहिं किंणु बालक हरसिणिअंबाओं जइ मे सिचअम्' इति उत्तरार्धन्तु पूर्वोक्तमेव। छायात्वेवम्—'मधूकैः किं नु बालक हरसि नितम्बात् यद्यपि मे सिचयम्' इति। उत्तरार्धे 'साहेमि' इत्यस्य 'साधयामि' इति छाया सदोषा। 'कथयामि' इति कर्तव्या-प्राकृते 'कथ' धातो 'स्साहादेशो यतो भवति कश्चित्तरुणः काश्चिद्वनीमगच्छत्। तत्र च मधूक - कुसुमान्युपचिन्वन्तीं काञ्चन तन्वीमपश्यत्। रहोदर्शनमात्रेण सक्तमानसस्तस्याःस्सविधमुपगम्य, किञ्चिद्धार्ष्टयमालम्ब्य मधूकान्याच्छेत्तुं यतते सा च तथाविधं तं दृष्ट्वा मदनावेशपरवशा आत्मानमर्पयितुमिच्छन्ती भङ्ग्यन्तरेणाऽऽशयमाविश्चकार। "अपि बालक, मधूकैः किं ते प्रयोजनम्? न केवलं मधूकानि, कदाचिद्धृष्टस्त्वं नितम्बाद्वसनमप्याच्छिनत्सि चेत्, कस्तत्र शासिता? कस्याऽग्रतो निवेदयिष्यामि? ग्रामोऽपि दूरेऽस्ति। अहमेकाकिन्यस्मि।" एवमप्रबुद्धबोधनमिव कुर्वन्ती भङ्ग्यन्तरेण "आवयोरहस्यसङ्गतिं रोद्धुं, अन्ततो

वेदितुं वा न कश्चिदस्ति । अतो यथेष्टमुपभोक्तुमर्हसि" इत्यवकाशं ददती, आत्मानं स्वयमेव दूती भूत्वा उपक्षिपति स्म । सर्वमिदानीं सुसङ्गतं भाति । श्री वेङ्कटाचार्य-परिष्करणे समीचीनः पाठोऽलम्भि 'मधूकैः किं वा पथिक यदि हरसि वसनं नितम्बात् ।

कथयामि कस्यारण्ये ग्रामो दूरे अहमेका'- इति छाया ।

स्वल्प एवाऽत्र पाठभेद इति न विमृश्यते ।

अन्याऽपि गाथा परिशील्यते—

**२-दि अहं खु दुक्खिआए सअल काऊण गेहवावारम् ।**
**गरुएवि मण्णुदुक्खे भरिमो पा अन्तसुत्तस्स ।**
**(पृष्ठे ५३) मुद्रिता छाया त्वेवम्—**

**"दिवसं खलु दुखितायाः सकलं कृत्वा गृहव्यापारम् ।**
**गुरुण्यपि मन्युदुःखे भरिमा पादान्त सुप्तस्य ।।"** इति

योषिदलङ्कारेषु औदार्यं लक्षयता धनिकेन उदाहृतेयं गाथा । तत्र 'खुडक्किआ' इति देशीपदमजानद्भिः 'खु दुक्खिआ' इति परिवर्त्य असाधुभावं गमितः पाठः । 'भरिमो' इति प्राकृतशब्दस्य 'भरिमा' इति छायाऽनुचिता । शब्दोऽपि न लक्ष्यते चेत् अर्थः कथं ज्ञायेत ? 'स्मरते र्भरसुमरौ इति प्राकृतव्याकरण-सूत्रेण 'स्मृ' धातुस्थाने 'भर' इत्यादेशः । अतस्तच्छाया 'स्मरामः' इति । सप्तशत्यां 'सअलं' पदस्य स्थाने ताए इत्यस्ति । तथा च सप्तशतीदृष्ट्या परिष्कारे कृते छाया एवं भवति । 'खुडक्किआ' इति देशीपदं रोषमूकायां वर्तते ।

**दिवसं रोषमूकायाः तस्याः कृत्वा गेहव्यापारम् ।**
**गुरुकेऽपि मन्युदुःखे स्मरामः पादान्तसुप्तस्य ।।** इति ।

कस्याश्चन कुलवध्वाः सार्वकालिक - प्रश्रयात्मकमौदार्यमत्र प्रस्तूयते । श्वश्रूं सर्वात्मना प्रीणयन्त्या तया निखिलमपि गृहकृत्यं दिवसमेव दिवसं कृत्स्नमभिव्याप्य, अत्यन्तसंयोगे द्वितीया' विधाय आयासमात्रपात्रीभूतायास्तस्याः क्रोध-जनित-सन्तापो दुर्भरो भवति । तथाऽपि सा मौनमेवातस्थुषी तूष्णीं सर्वं विषेहे । निशि प्रेयसि शयिते, तत्पादान्त-भागे, तमप्रबोध्यैव, किञ्चिदवकाशं लब्ध्वा सा सुष्वाप । 'एवं कृते तदीयचरणस्य मदङ्गस्पर्शे सति कान्तो मदीयामवस्थां विज्ञाय कदाचिन्मामनुग्रहीष्यतीति प्रत्याशा तस्याः मनो राज्यपदवीमधिशेते । इमं वृत्तान्तं जानन् नायकः सखायं प्रति तस्यास्तादृशं स्वापं स्मरामीति निवेदयति । एवमत्यन्तरसनिर्भराया गाथायाः पाठवैयाकुली मनसः क्लेशमातनुते ।

अस्या गाथायाः पाठः श्री वेङ्कटाचार्य-परिष्करणे किञ्चिदिव भिन्नो दृश्यते । तत्र 'दिअहं अडुडूक्कि आए' इति पाठो विमृश्यः । तस्य छाया मुद्रिता दिवसमड्डूल्कृतया इति । मण्णुदुक्खे' इति प्राकृतस्य 'मन्तुदुःखे' इति प्राकृतस्य 'मन्तुदुःखे' इति छाया, मन्तुः कोपविशेषः इति व्याख्यानञ्च अनुचितं भाति । ,मण्णु' स्थाने 'मन्तु' इति प्राकृत पाठः स्वीकर्तव्यः 'मण्णु' शब्दस्य 'मन्यु' इत्येव छाया भवेदिति । डुडूकारः रणरणिका' इति नृसिंहव्याख्या । रणरणिका उत्कण्ठातिशयः । अडुडूल्कतया इति तृतीयान्तस्य कथमन्वयः'.. कृताया इति षष्ठ्यन्तं स्यातां च्चेत्, तस्य पदस्य पादान्तसुप्ताया इति पदेनाध्याहृतां नायिकां प्रति विशेषणत्वं सम्भवेत् । तदाऽयमर्थः । अडुडूल्कृतायाः डुडूल्कृतं भावे—क्तान्तम् । डुडूत्कार इत्यर्थः । न विद्यते डुडूल्कृतं यस्या इति रणरणिकारहिताया इत्यर्थः । पतिसुखमजानानायाः केवलगृहकर्मव्यापृताया उत्कण्ठादिकं प्रश्रयेण अप्रदर्शयन्त्यास्तस्या वध्वा इत्यर्थो वर्णनीय इति मन्ये । श्रीवेङ्कटाचार्योमुं पाठं श्लाघमानोऽपि निघण्टावस्य पदस्य उपरिनिर्दिष्टार्थबोधकत्वं न दृश्यते इति लिखन् किञ्चिदतृप्ति प्रदर्शयति । अतोऽहं मन्ये 'खुडक्कि आए इति पाठः सन्दर्भानुगुणः स्वीकारार्हः इति । विनीताया वध्वाः रोषमूकाया इति विशेषणं शोभां पुष्णाति ।

एतादृशी वार्ता गृहे गृहे प्रत्यक्षीक्रियत एव। मयाद्वा भक्ते वर्ा श्वश्र्वादिगुरुशुश्रूषापरा वधूः, दुर्भरामपि वेदनां सोढ्वा, पटुप्रसरमपि कोपमन्तर्निगूह्य, न किञ्चिद्वहिर्वक्तुं प्रगल्भमाना निशीथे प्रियसान्निध्यमात्रेण कथञ्चित् तृप्तिमश्नुवाना दृश्यते।

इयमपि गाथा आकर्ण्यताम्—

३. "होतं पहि अस्स आ आ आउच्छण
जीअ - धारण - रहस्सम्।
पुच्छन्ती भमइ घरं घरेसु विअ
विरह सरीआ॥" (१०४ पृष्ठे)

'भविष्यत्पथिकस्य जाया आयुःक्षण-
जीव - धारण - रहस्यम्।
पृच्छन्ती भ्रमति गृहात् गृहेषु प्रियविरहसह्लीका॥"

एते प्राकृतगाथा-तच्छाये। 'आयुःक्षणजीव' इति 'सह्लीका' इति च द्वयोरंशयोः कथञ्चिदप्यर्थो ज्ञातुं न शक्यते। प्रवासविप्रयोगभेदेषु अन्यतमस्य यास्यत्प्रवासस्योदाहरणीकृता गाथेयं विकृता सती बाधामनुभावयति। छायया एवं भवितव्यम्।

'भविष्यत्पथिकस्य जाया,
आपृच्छन जीव-धारण-रहस्यम्।
पृच्छन्ती भ्रमति गृहंगृहेण,
(घरंघरेण)प्रियविरहसहनशीलाः'॥ इति।

प्रवत्स्यत्पतिकायाः प्रेयोगतप्राणाया अतिमुग्धाया हृदयग्राही वृत्तान्तोऽत्र प्रस्तूयते। प्रियः प्रवत्स्यतीति श्रुत्वा, तत्प्रयाणेऽन्तरायं परिहर्तुकामा, तत्रोचितमुपायं जिज्ञासमाना सती, गृहाद्गृहमुपयान्ती काचन बाला सर्वाः प्रतिवेशिनीरेवं पृच्छति—"सखि, मद्दयितो देशान्तरं जिगमिषति। ममोपकण्ठमागत्य 'प्रिये याम्यह'मिति आप्रक्ष्यते। तादृशप्रश्नकाले गमनोन्मुखीभविष्यतः प्राणान् धतुं कतम उपायः? येन मे प्रेयसः प्रयाणे विघ्नो न भवेत्। तद्रहस्यं कृपया मह्यमुपदिश। अनुभूतपूर्वप्रियविरहत्वात् सिद्धानुभवा त्वं भवसि इति प्रियविरहसहनशीलाः कान्ताः पृच्छन्ती अविश्राम्यन्ती गृहाद्गृहं भ्रमति। अत्र नायिकाया मुग्धतासुन्दरः काष्ठाधिरूढश्च प्रणयः ललित मधुरया विधयाऽसूच्यत। समीचीनपाठः गाथासप्तशत्यां (I-47.) श्री वेङ्कटाचार्य - परिष्करणे च लक्ष्यते।

४. अन्तत एकमुदाहरणं दर्शयामि, येन कथं मनुजस्य स्वल्पेऽपि विषये भ्रमः प्रमादो वा सुलभो भवतीति ज्ञायते। तृतीय प्रकाशे प्रस्तावनायाः प्रस्तावे उपलभ्यमानः कश्चित् श्लोकः 'रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थ सूचकैः' इत्युपक्रान्तोऽस्ति। तत्र उपरितनश्लोकार्धस्य अवलोके विवरणं—'रङ्गस्य प्रशस्ति काव्यार्थानुगतार्थैः कृत्वा इत्यस्ति। 'रङ्गं प्रसाद्य' इत्यस्य 'रङ्गस्य प्रशस्ति कृत्वा' इति विवरणं न स्वदते। प्रशस्तिपद-स्थाने क्वचित् प्रसक्तिं इति पदमुपलभ्यते। तस्य प्रसक्तिरत्र का नाम? धनिकेन 'प्रसत्ति' इति लिखितं स्यात्। प्रपूर्वक सद् धातोः क्तिनि प्रसत्तिरिति पदं प्रसादार्थकं झटित्यविज्ञाय केनचित् अन्यथा लिखितं भवेत्। प्रसाद्य इत्यस्य प्रसत्ति कृत्वा (छित्वा इत्यस्य छेदनं कृत्वा इतिवत्) इति रङ्गं प्रसन्नं कृत्वा इत्यर्थबोधकं विवरणं उचितं भवेत्। स्थालीपुलाकन्यायेन दशरूपकं विचार्य किञ्चिदिव **कुवलयानन्दं** प्रस्तोतुमुत्सहे।

शताधिकग्रन्थकर्त्रा अप्पय्यदीक्षितेन रचितेषु प्रबन्धेषु अन्यतमोऽयमलङ्कार - ग्रन्थोऽतीव प्रसिद्धः। परीक्षार्थं निर्दिष्टत्वात् प्रत्यहं पठ्यते पाठ्यते च। पीयूषवर्षापरनामधेयेन जयदेवेन रचितस्य चन्द्रालोकस्य पञ्चममयूखस्थं अर्थालङ्कारभागं स्थूलतयाऽऽधारीकृत्य प्रपञ्चितः तलस्पर्शिविमर्शात्मकोऽयं प्रबन्धः परिष्करणस्य अपर्याप्त-

त्वात् तत्र तत्रापपाठैः कलुषित एवाऽमुद्रत । अध्ययन-समये 'शर्करापानके सिकताकणा' इव ते दोषाः रसानुभवं प्रतिबध्नन्ति । तादृशाः केचनाऽत्र परामृश्यन्ते; साधुपाठानां सूचनार्थोऽपि कश्चित्प्रयत्नो यथागति विधीयते । वृत्तभङ्गाः क्वचिल्लक्षिताः । अपशब्दाः कुत्रापिदृष्टाः । अस्वस्था अपि पाठा कुहचिद्विलोकिताः । तेच क्रमशः विचार्यन्ते ।

प्रथमत श्छन्दोभङ्गो विमृश्यते ।

**१. खमिव जलं, जलमिव खं, हंस इव चन्द्रः,**
**चन्द्र इव हंसः ।**
**कुमुदाकारास्तारा, स्ताराकाराणि कुमुदानि ॥**
( ११ पृष्ठे )

अत्र निबन्धे सर्वत्र निर्णय-सागरमुद्रायन्त्रालये १९५५ (सन्) वत्सरे मुद्रित एव ग्रन्थः परामृश्यते । उपमेयोपमायाः उदाहरणतया प्रदर्शितोऽयं श्लोकः आर्यावृत्तबद्धः । अत्र पूर्वार्धे कथञ्चित् त्रिंशन्मात्रा स्सन्ति । तथाऽपि पञ्चमं गणं परिशीलय । ख[1] मिवज–लञ्जल[2]–मिव[3]–ख–हंसइ[4]–वचन्द्र[5]–(इवन्द्र)' इत्थं च पञ्चमो गणः वचन्द्र ( श्र ) स्ति । गणेन चतुर्मात्राकेन विभक्तेन च माव्यम् गणाश्चतुर्लघूपेता' इत्यनुशासनात् । 'व' इत्यस्य एका मात्रा; 'च' इत्यस्य 'न्द्र' परकस्य संयुक्तपरकत्वेन द्वे मात्रे । पुनः 'न्द्र' इत्यस्य, 'श्च' इति सयुक्तपरकत्वेन द्वे मात्रे इति पञ्चमात्राको 'वचन्द्र' (श्र) इति गणस्सम्पद्यते । एषा रचना असाम्प्रदायिकी । क्वचिल्लभ्यमानः 'हंस श्चन्द्रइ वहंस-इवच-न्द्रः' इति पाठस्साधीयान् । अत्र 'चन्द्रइ' ( व ) इति पञ्चमो गणश्चतुर्मात्राक एव । चन्द्र इव हंस इव चन्द्रः इत्यन्वयेन उपमेयोपमाऽपि निरुह्यत एव । खमिव जलं, जल मिव खं, हंस इव शशी, शशीव कलहंस इति व्यक्तिविवेकादृतः पाठो वा स्वी-क्रियतामदुष्टत्वात् ।

एवमेव कुवलयानन्दे मुद्रिता काचिदार्या, प्रसिद्ध माधारं विनाऽपि आधेयस्थिति-वर्णनरूपस्य विशेषनाम्नोऽलङ्कारस्य उदाहरणतया दत्ता परिशील्यताम् ।

**२. 'कमलमनम्भसि, कमले कुवलये तानि**
**कनकलतिकायाम्**
**सा च सुकुमार सुभगेत्युत्पातपरम्परा**
**केयम् ।''** ( १२३ पृष्ठे )

पूर्ववदत्राऽपि छन्दोभङ्गः कमलम[1]-नम्भसि[2]-कमले[3]-कुवलयेइति[4] गणविभागः । अत्र चतुर्थो गणः परीक्ष्यताम् । कुवल इति त्रयाणां लघुवर्णानां तिस्रो मात्राः, 'ये' द्वे मात्रे; आहत्य पञ्चमात्राको विरुद्धो गणः । अन्योऽप्यत्र दोषः । अत्र पूर्वार्धे २३ वर्णाः । अत्र गुरुवष्ट्, तेषां मात्राः १२, लघवः १७ इति ( १२ + १७ = २९ ) आहत्य एकोनत्रिंशन्मात्रा एव भवन्ति । त्रिंशता मात्राभिर्भवितव्यम् । सप्त गणाः, एको गुरुः (७ × ४ = २७ + २ = ३०) इति संख्याने तत्सिद्धं भवति । एकमात्रान्यूनताऽपि छान्दसं पङ्गुत्वं सूचयति । एतत्परिहरणायेव 'कमल मनम्भसि, कमले कुवलय, मेतानि कनकलतिकायाम् 'इति' कमलमनम्भसि, कमले कुवलेऽपिच तानि कनकलतिकायाम्' इति द्वौ पाठौ पर्यकल्पिषाताम् । अत्र द्वयोः पाठयोरपि किञ्चिदस्वारस्यमस्त्येव । प्रथमपाठे, कमलमेकं कुवलयमेकञ्चेति द्वयोरनन्तरं, एतानीति बहुवचनान्तेन अनुनिर्देशः कथं न्याय्यः ? द्वितीयपाठे अनतिप्रसिद्धस्य 'कुवल' शब्दस्य प्रयोगस्तृप्तिं न जनयति ।

वस्तुतस्तु, अत्र सम्भूतः प्रमादस्त्वयम्-'कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम्' इत्येव, कमले-कुवलये शब्दयोर्मध्ये चकार घटिता आर्या कवि ग्रथिता स्यात् । प्रमादवशाच्चकारो लोपं गमितः । मात्रान्यूनतामजानद्भिः सोऽसाधुपाठः गतानुगतिकन्यायेनाऽनुसृतः । चकारः स्खलित इति ज्ञानेन दोषोऽपोहितु

शक्यते। अतएव भट्ट-वामन-झलकीकरेण स्वीये काव्य-प्रकाशे, मथुरानाथशास्त्रिणा स्वकीये रसगङ्गाधरे च साधुपाठ एवाहृतः। गणविभागस्तु एवम्-कमलम-[1]-नम्भसि[2]-'कमले[3]-चकुवल[4]-येता[5]-निकनक[6]-लतिका[7]-याम्' इति।

### अथाऽपशब्दाः केचन

१. अपह्नुत्यलङ्कार-निरूपणावसरे बिल्हणरचितत्वेन प्रसिद्धमेकं पद्यमुदाहरणत्वे नोपात्तम्।

अङ्कं केऽपि शशङ्किरे, जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च सञ्जगदिरे भूच्छाय मैच्छन् परे।
इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
तत्सान्द्रं निशिपीतमन्धतमसं कुक्षिस्थमाचक्ष्महे
(२६ पृष्ठे)

तत्र 'सञ्जगदिरे इति प्रयोगोऽसाधुः गदव्यक्तायां वाचि इति धातुः भ्वादिषु पठितः परस्मैपदी।

[क्रमशः

# वाराणसेयसंस्कृतवाग्वर्द्धिनीसभा

भाद्रयांशुक्लाष्टम्यां तिथौ ४-२-७९ ई० दिने स्थानीये गीता मन्दिरे सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य साहित्य विभागाक्षाणां डा० कैलासपति त्रिपाठि महाभागानामाध्यक्ष्ये वाराणसेय वाग्वर्धिनी सभा योजिता। संचालनं राममूर्तिचतुर्वेदिना विहितम्।

तत्र प्रथमतः श्लोकान्त्यक्षरी सूत्रान्त्यक्षरी प्रतियोगिताः अभूवन्। तदनन्तरं हलन्त्यमिति सूत्रमधिकृत्य शास्त्रार्थोजातः। तत्र छात्राणामाशयप्रकाशन-व्याजेन समाध्यक्षः डा० त्रिपाठीभि मुख्यातिथिपदमलङ्कुर्वाणैः पं०नवरङ्ग-चतुर्वेदि-महाभागैश्चबहूनि विवेचनानि कृतानि। अस्मिन्नेव सन्दर्भे न्याय वेदान्तशास्त्रार्था अप्यभवन्।

छात्राणां भाषणानि जातानि। तत्र बालयोः श्री देवकुमार-श्रीकान्तपाण्डेययोः सुमधुरं सुस्पष्टंच व्याख्यानं सर्वेषां कृते प्रेरणास्पदमासीत्।

श्री गायत्रीनन्दनब्रह्मचारिणां प्रयत्नं, छात्राणां योग्यतामथच तेषां समुत्साहं, विवृण्वन्तः संस्कृतप्रचाराय कार्यं यज्ञवत् पुण्यावहमिति मन्वानाः पं० चतुर्वेदि महोदयाः आचारसम्पन्नवैदुष्यसमर्जनाथ संस्कृतसमाज प्रैरयन्। संस्कृतस्य विश्वव्योम्नि प्रचारस्य सम्प्रति आवश्यकता इति चापि बहुभिः प्रकारैः व्यश्लिक्षन्।

अध्यक्षीय भाषणे डा० कैलाशपति त्रिपाठिभिः संस्कृत-शिक्षायाः विभिन्नाः पक्षाः, विचारिताः। इदानीन्तनो यो नवो नियमः आई० ए० एस० प्रभृति केन्द्रीय परीक्षाणां प्रवृत्तो विद्यते, तेन आँग्लभाषाव्यामोहः शिथिलो भविष्यति। स्थितावस्यां निखिलभारतीय-जनमनोग्राह्या काचित् सम्पर्कभाषा अन्वेषणीया भविष्यति। प्रकरणेऽस्मिन् संस्कृतातिरिक्ता नास्ति काचिददीदृशी भाषा याधिकतमजनसम्मानभाजनं भूयात्। संस्कृतावाक् स्वीयया योग्यतया सम्प्रति विश्वं व्याप्नोति। यदि जनशक्तिः अनया योग्यतया सन्नद्धा स्यात् तदा उभयोः भवेत् सुमहत् कल्याणम्। अद्य संस्कृते लिखितं न कश्चित् प्रकाशितंच न कश्चित् क्रीणाति अमूल्यं तत् सादरं वितीर्णमपि न कश्चित् पठति, तथापि संस्कृते प्रत्यब्दं नवानि काव्यानि नाटकानि, शास्त्रीयाणि चिन्तनानि, पत्रपत्रिकाश्चानुदिनं प्रकाश्यन्ते। कोऽत्र हेतुः? केवला योग्यता स्वीया संस्कृतस्य।

अन्ते वाग्वर्धिनी-संयोजकानां पावनमुद्देश्यं प्रत्नंच श्लाघमानैः डा० त्रिपाठि महोदयैः संस्कृतसमुन्नतये काश्चन सुसाध्याः योजनाः व्याकृताः अथ च एवं विधानां वाग्वर्धन-प्रयासानामुपयोगिताः विश्लिष्टाः शास्त्राणां या सम्प्रति क्षीणवसी स्थितिः तस्याः व्यपगमाय शास्त्रार्थस्य अथ च परिचर्चायाः आवश्यकताश्चेत्यादि प्रतिपादिताः। कृतज्ञता ज्ञापन सन्दर्भे श्री गायत्री नन्दन ब्रह्मचारिणा निखिलेऽपि विश्वस्मिन् संस्कृतप्रचारस्य स्वकीयः सङ्कल्पः उदघोषि: विदुषां, छात्राणांच उत्साहसम्पन्नः सहयोगोयाचि।

प्रेषकः :—ब्र० गायत्रीनन्दनः
श्री गीताप्रचार मन्दिरम्, मिश्र पोखरा, वाराणसी।

पूर्वतोनुवृत्तम्

# कर्ममीमांसा दर्शनम्

## भगवत्पूज्यपाद महर्षि-योगिराज स्वामिज्ञानानन्दमहाराजः

इदानीं देशकालपात्रसम्बन्धं व्याचष्टे —

**योग्यदशायाम् ॥ ३२८ ॥**

योग्यदशायां प्रतिक्रियापि तद्योग्यैवावधेया। कर्मविपाकस्य तादृशो नियमो निभाल्यते यत् यस्यां दशायां क्रिया विधीयते, तस्याः प्रतिक्रियाऽपि तद्दशायामेव प्रादुर्भवति, यत्र वयसि देशे काले वा क्रिया समनुष्ठिता तत्प्रतिक्रियाऽपि तत्रैव समुत्पद्यते। विपन्नदशायां कस्यचिद्धनापहरणेन विपन्नदशायामेवासौ दरिद्रतामापद्यते। विपत्तौ दानविधानेन तादृशदशायामेव दातुः साहाय्याधिगमः स्यात्। एतद्विज्ञातस्यैतदुदाहरणदिग्दर्शनमवधेयम् ॥३२८॥

अन्यदपि—

**पारस्परिका सा ॥ ३२९ ॥**

सा क्रिया-परिणतिः पारस्परिका पारस्परिकसम्बन्धयुक्ताऽपि ज्ञातव्या। कर्मविपाकस्यायमपि नियतो यत् भोगावस्थायां परस्परसम्बन्धेन युज्यते। उदाहरणत एतदवगन्तव्यं यत् यदि केनाऽपि कश्चित् हन्यते यदा जन्मान्तरे हन्ताऽपि तेन हेतो र्भवति। एतस्य साक्षाद्रूपेण परोक्षरूपेण वा कारणमवसीयते। यादृशः कर्मवैशिष्ट्यं तादृश्येव प्रतिक्रियाऽपि ॥३२९॥

अयुक्तं कर्म निर्णीय युक्तकर्मस्वरूपं निर्णीयते—

**युक्तकर्म मुक्तिदमेकत्रच ॥ ३३० ॥**

युक्तं कर्म मुक्तिदायकम् एकमद्वितीयं च विज्ञातव्यम्। अयुक्तकर्मविपाकपद्धतेर्दिगदर्शनं पूर्वस्मिन् सूत्रे बहुशः प्रपञ्चितम्। बहुशाखासंयुक्तत्वादयुक्तं कर्म बहुप्रकारकं निर्दिष्टम्। वासनाया अनन्तत्वाद् अयुक्तं कर्मापि अनन्तस्वरूपधारकम्। अतस्तत्प्रतिक्रियास्वरूपः कर्मविपाकोऽपि वैचित्र्यपरिपूर्ण इत्यत्र कः सन्देहः। विभिन्नवासनामूलकत्वेन शुभाशुभोभयविधात्मकातिवैचित्र्यपूर्णगमागमचक्रावर्त्तानुसारेण च प्राप्तं अयुक्तं कर्म नास्ति किल सीमाबद्धम्। परन्तु युक्तकर्मविपाको नैवं विधः। युक्तं कर्मकलक्ष्योपेतमात्माभिमुखसंलग्नं मुक्तिप्रदं च, तत्स्वरूपमप्येकमेव। यथोक्तं गीतोपनिषदि—

"युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कर्मकारेण फले सक्तो निबध्यते॥"

युक्तं कर्म विचारप्राधान्यं भक्तिप्राधान्यं चेति द्विविधं भवति। एतदुदाहरणमपि गीतोपनिषदि, यथा—

"कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥"
तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः।
गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्तः उपासते॥

प्रथमं विचारप्रधानस्य द्वितीयं च भक्तिप्रधानस्य कर्मण उदाहरणमवगन्तव्यम्, द्वयमप्येकमेव। वस्तुतः उभयत्रापि कर्मफलसमीहानाशः लक्ष्यमेकमात्माभिमुखं तिष्ठति। एकतत्त्व-कर्मयुक्तमन्तःकरणमुभत्रापि तिष्ठति, इयानेव भेदो यत् एकत्र कर्त्तव्यबुद्धेः प्राधान्यमन्यत्र च जगदीश्वराभिमुखभक्तियुक्त भावस्य प्राधान्यम्। अतएव युक्तं कर्म

एकतत्त्वयुक्तं मुक्तिकारणं च । अयुक्तकर्मणि जैव्या वासनायाः साक्षात् सम्बन्धः। वासनाया अनन्तशाखासंयुक्तत्वात् अयुक्तकर्मणि नैव भवितुमर्हत्येकत्त्वोदयः । परमयुक्तस्य कर्मणो यादृशमपि स्वरूपं भवेत्, तत्र वासनालेशसम्भावनाराहित्यात् एकतत्त्वोदयस्तिष्ठत्येव । अन्यच्च कर्मणोऽपरिहार्यशक्तिः स्वकीयाभ्युदयकारिण्या क्रियया आत्मलक्ष्ययुक्तस्यैकतत्त्वस्य सहयोगेन कर्त्रे निःश्रेयसपदं प्रयच्छति ॥ ३३० ॥

प्रसङ्गतो वर्णाश्रममहत्त्वं प्रतिपादयति—

**वर्णाश्रम धर्मो नैसर्गिकं युक्तकर्म।।३३१।।**

वर्णश्चाश्रमश्च वर्णाश्रमौ तयोर्धर्मः कर्तव्यमिति यावत् नैसर्गिकं युक्तकर्म व्यक्तिगते युक्तकर्मणि यथा किलात्मनोऽभिमुखमबाधगतिस्तिष्ठति, तथैव वर्णाश्रमधर्मेऽपि स्वभावतः सा स्थायिनीति हेतोः पूज्यपादो महर्षिः सूत्रकारो वर्णाश्रमधर्ममहत्त्वं प्रतिपादयति । वर्णाश्रमधर्मे कथमिवात्मन ऊर्ध्वगतिस्तिष्ठतीत्यस्य विवेचनं प्रागेव समनुष्ठितम् । जीवो हि विवेकमन्तरेणापि वर्णाश्रमधर्माचारान् यथोचितं परिपालयन् अनेकजन्मानन्तरेऽपि नूनमेव ब्राह्मणवर्णमासाद्य संन्यासी भूत्वा परमहंसगतिं प्राप्य च मुक्तिपदमधिगच्छत्येव । युक्तं कर्म यथा एकस्मिन् एव जन्मनि निःश्रेयसं प्रयच्छति, तथैव वर्णाश्रमधर्मो ह्यनेकजन्मान्तरे जीवं मुक्तिभूमिं नयति । कर्मयोगिनः एकजन्ममार्गो वर्णाश्रमधर्मिणामनेकजन्मनः पन्थाः निःश्रेयसफलार्पणे समान इति हेतोर्वर्णाश्रमधर्ममहत्त्वं स्वतः सिद्धम् ॥ ३३१ ॥

तत्पवित्रतां वर्णयति –

**स पावनस्तपोवनवत् ।।३३२।।**

स वर्णाश्रमधर्मस्तपोवन इव परमपावनो वेद्यः । त्रिलोक पवित्रकारिणस्तपोवनस्य महत्त्वं सर्वातिशायीति निश्चप्रचम् । स्थूलशरीरे मस्तकमिव, सूक्ष्मे शरीरे बुद्धिरिव मृत्युलोके तपोवनं सर्वाभ्यर्हितम् । वेदाविर्भावस्थानत्वात्, आर्यजातेर्लीलाभूमित्वात्, आत्मज्ञानस्य विकासरूपत्वाच्च मृत्युलोके आर्यावर्त्त उत्तमाङ्गरूपः । पुनश्चानेकतीर्थराजिविराजिते आर्यावर्त्तेऽपि तपोवनसमूहो महातीर्थभूतः सर्वोत्तमश्च । तपःस्वाध्यायनिरत-विषय-विरागरहितपरोपकारव्रत-परायणात्मरतिनिरतदेवाराध्य - ब्राह्मणवर्गो जगत्कल्याणबुद्धया तपोवने निवसति । तदीयविवेकनिःसृतऋतम्भरा परिणामरूपशास्त्रसमूहावलम्बनेन निर्गतो ज्ञानज्योतिषां विस्तरो न केवलं मृत्युलोकमेव प्रत्युत त्रिलोकमेवालोकयति । शूद्राणां शिल्पकलादीनामैश्वर्येण, वैश्यानां धनधान्यसमूहेन, क्षत्रियाणामतुलनीयराज्यवैभवेन, किम्बहुना जागतिक-सर्वविधैश्वर्यसमूहेनापि विच्छिन्नसम्बन्धास्तपोवनवासिनो निवृत्तिसेविनो ब्राह्मणाश्चातुर्वर्ण्यमर्यादा संरक्षणं सम्पूर्णाया अपि जागतिकमानवजातेराध्यात्मिकाधिदैविकाधिभौतिकाख्यत्रिविधिकल्याणेषु निरतसन्तस्तपोवनानां पवित्रतां परिरक्षन्ति । एतादृशब्राह्मणवासपूत-तपोवनमहिम्नां समधिकमपि गानं स्वल्पमेव । रागद्वेषरूपो रजस्तमोविकारो नैव तपोवनं स्पृशति । एतस्य प्रत्यक्षं समुज्ज्वलत् प्रमाणमिदमवधेयं यत् हिंस्रपशवोऽपि स्वीयां हिंसनप्रवृत्तिं विस्मरन्तस्तपोवने विचरन्तस्तदीयां शोभामभिवर्धयन्ति । प्रकृतिमाता स्वयमपि स्वीय-सर्वप्रियपुत्रप्रेमवशीभूता निजं सम्पूर्णसौन्दर्यं विकासयन्ती यत्र विराजते । अध्यात्मचिन्ताव्यतिरिक्तचिन्ताया अवसर एव तपोवने नायाति । एतादृशतपोवनमहत्त्ववर्णनं केन कर्तुं शक्यते ? साधारणबुद्धया मनुष्यो यथा पृथ्वीमेव क्षेत्रं समाम्नाति, तथाऽन्तर्दृष्टिसम्पन्नो योगी स्थूलं शरीरं हि क्षेत्रं जानाति । भूमिविचारेण यथा तपोवनपवित्रता सर्ववादिसम्मता, तथैव स्थूलशरीरपवित्रतासंरक्षणाय वर्णाश्रमधर्मपरिपालनं परमपवित्रं कार्यमवगन्तव्यम् ।

[क्रमशः

# 卐 भुवि विजयते तीर्थराजप्रयागः 卐

डॉ० शिवजी उपाध्यायः

( साहित्य प्राध्यापकाः सं सं. वि. वि. वाराणसी )

शान्तो दान्तो मुनिरिव तपः पूतमूर्तिः प्रशान्तः,
सौम्यो रम्यो बिशदवसुधा - मौलिमालायमानः।
तूर्णं पुण्यं दिशति नियतं स्वान्तमभ्यागतानां
भव्यो दिव्यो भुवि विजयते तीर्थराजः प्रयागः ॥ १ ॥

स्वच्छच्छायोत्थितपुलिनकं कंजकुञ्जावदातं,
कम्बुप्रायप्रचलमकरं यस्य वारां वितानम्।
वारं वारं यदमृतपयः पानपुष्टीकृताङ्गाः
सङ्गाद्यस्यामित-जनिसुखं केऽपि चान्ते लभते ॥ २ ॥

प्राच्यां यस्यानुपमितपुरी काशते काशिकाऽसौ,
सौख्यासारं वपुषि दधती कर्णपूः सा प्रतीच्यां।
आचामन्ती निखिलकलुषं काचिदम्बाः ह्यवाच्यां,
यस्योदीच्यां कलकलरवो जन्हुकन्याप्रवाहः ॥ ३ ॥

गङ्गाम्भोर्मिमिलित - यमुनाऽन्तस्सरस्वत्यमन्द-
स्यन्दैर्यस्य प्रणवमहिमोद्भासिका यस्य कीर्त्या
तीर्थैः सम्यक् सलिलभरितैश्चैकमत्येन तैः प्राक्-
सम्भूयद्राक् स्वयमतुलितस्तीर्थराजीकृतो यः ॥ ४ ॥

तस्य प्रार्चा मुदितमनसां देवतानां मुनीनाम्
आवासेन प्रथित - यशसः पूर्ण - कुम्भाभिषेके।
सद्यः स्नानाद् भरततटिनी-सङ्गमादम्बुपानाद्,
धन्यात्मानः सुकृतमतनु - प्राप्तुकामा यतन्ते ॥ ५ ॥

# ऐतिहासिके विश्वसंस्कृतसम्मेलने

२४ दिसम्बर १९७९

विश्वतः समागतानां

## विश्वविश्रुतानां विदुषां

स्वागतार्थं स्वयम् श्राविता

**महाकवीनामभिराजराजेन्द्रमिश्रमहाभागानां शोभनागीतिः**

### विदधात्ययं प्रयागो रे भवतां सभाजनम् !

विदधात्ययं प्रयागो रे भवतां सभाजनम्
भवतां सभाजनं बन्धो ! भवतां सभाजनम् !!

महाराष्ट्रतः केचिदागताः केचित्केरलतः
तमिलधरातः केचिदागताः केचिच्चोत्कलतः
गुर्जरान्ध्रकर्णाटकधरणीतः ये केचिदागताः !!
तेषां मनीषिणां कृते क्रियतेऽभिवादनम् । विदधात्यं प्रयागो रे ··!

क्वचिदिह परिषदि विभाति बङ्गो ह्यरुणाचलराज्यम्
अङ्गः क्वचित्क्वचित्कश्मीरं मृज्जोऽसमराज्यम्
राजस्थानपञ्चनदयुगली कलयति विभूषणम् !!
सर्वेभ्यः शुभमस्तुकलं कविता-नीराजनम् ! विदधात्यं प्रयागो रे···!

हरयानं मणिपुरं श्रीकश्मो नागदेशभूमिः
मेकलसुताजलार्द्रशरीरा मध्यदेशभूमिः
हिमाचलो मेघालयमहितो ह्लादयते विपुलम् !!

विधिकृतदशाश्वमेघपाविता कविकुलगुरुगीता
कुलपतिभारद्वाजपूजिताऽक्षयवटसुप्रीता
भट्टकुमारिलचितिस्थलीयं तनुते सुमङ्गलम् ! विदधात्यं प्रयागो रे ·!

तीर्थपतिरयं ननु सर्वेषां सर्वेषां गङ्गा
यमुनेयं सर्वेषां बन्धो ! कृतमुकुन्दसङ्गा
सरस्वती रसनाग्रनर्तकी मदयेज्जनं जनम्
विदधात्ययं प्रयागो रे भवतां सभाजनम् !!

सम्पादकः, प्रकाशकः, मुद्रकश्च-डॉ० परमहंस मिश्रः, श्रीभारतधर्ममहामण्डलम्, लहुराबीर, वाराणसी-२२१००१
मुद्रण-स्थलम्—जय भारत प्रेस, बांसफाटक, वाराणसी

New Clerks Bread Mfg Co

http://slidepdf.com/reader/full/suryodaya-surya-vigyan-visheshanka-bharat-dharma-maha-mandala 